No. ४७४६

Title ब्रम्हाण्डपुराणे अध्यात्मरामायणटीका रामगीतोत्सवः

Author रामसहायः टेकचन्द्र पुत्रः

Extent १० पत्राणि Age ×

Subject पुराण माहात्म्यादि

रामगीता टीकासहिता ब्रह्मानन्दसमायत्ते

४७४६

4746

F=10

ॐ श्रीगणेशाय नमः ॥ हरिरद्वविधयस्तत्कर्मविश्वं तयैव तत्स्फुरितमनवबोधे यत्र बोधेन भाति गुणरहितमजमादिः सच्चिदानन्दमूर्तिः सकलमलविरामः सोऽहमेवास्मि रामः १ स्वल्पायुर्बुद्धिभा
जाममिलषितफलं तेन नारदेन प्रयुक्तः स्वप्रासर्वार्थसारं रघुपतिचरितं प्राह तेभ्यः प्रसन्नः तत्रापि स्वेन सम्यक्कृतिगणगहितस्तात्म बोधं विवक्षुः श्रीरामेणैव गीतां स्फुटरुचिरपदां रामगीतां बब
न्ध २ निःशेषपापतापरहरस्मज्ञात्वा श्रीरामगीतामनधीतशास्त्रः कृपापरक्षणमवलम्ब्य रामसहायेनात्माविहृणोति किञ्चित् ३ इह खलु परमकारुणिकेन नारदेन चतुर्विधपुरुषार्थसाध
नभूतानां वेदपुराणेतिहासानां कर्मज्ञानोपासनानामनेकविधानां विलम्बितफलानां सदाचाराविद्यादिस्त्रवणादिचिन्ताबधानेपालितानाम्यानीतं इह दिनेः स्वल्पतरायुर्बुद्धिप्रभावैरत्यन्तपापात्मभिः
कलियुगपुरुषैः कर्तुमशक्यत्वाद्ब्रह्मादिनाकृतानामपितेषां तत्पापनोदाय तमत्वाच्च कथं तेषां स्वर्गापवर्गौ स्यातामिति चिन्तापरेण ब्रह्मलोकं गत्वा इदानीमेकमेवाभिलष्ट्वा तं प्रसवरसत्तम नद्वद
स्वमपि भूमिद्वयहितेन त्वयहो मयि १ प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः दुराचाररताः सर्वे सत्यवार्त्तापराङ्मुखाः २ परापवादनिरताः परद्रव्याभिलाषिणः परस्त्रीसक्तमनसः परहिंसापरायणाः ३
देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिङ्कराः ४ विप्रा लोभग्रहग्रस्ता वेदविक्रयजीविनः धनार्जनार्थमभ्यस्तविद्या मदविमोहिताः ५ त्यक्तस्वजातिकर्माणः
प्रायशः परवञ्चकाः क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशीलिनः ६ तद्वच्छूद्राश्च ये केचिद्ब्राह्मणाचारतत्पराः स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाननिर्भयाः ७ श्वशुरद्रोहकारिण्यो भविष्यन्ति न संशयः
एतेषां नष्टबुद्धीनां परलोकः कथं भवेत् ८ इति चिन्ताकुलं चित्तं जायते मम सन्ततम् लघूपायेन येनैषां परलोकगतिर्भवेत् ९ तमुपायमुपाख्याहि सर्वं वेत्ति यतो भवान् इत्येवं पृष्टः सन्स
र्वलोकपितामहः परमेश्वरस्याप्तकामस्य श्रीरामस्य यद्यदाचरितं दुर्लभं देवैरतो जनैः स्वयमाणंकुर्वल्लोकस्तदनुवर्तते इत्सीदेयुरिमे लोका न कुर्यां कर्मचेदहम् इति मनसि कृत्वा यथा
मया क्रियते तथान्ये पि धर्मयशोविरहेष्वर्य कर्म कुर्युरिति लोकशिक्षार्थं कर्म कुर्वतः श्रद्धालिपापपूर्वकं वर्णाप्रमात्र कुलमनोरमकर्मानुष्ठानप्रतिपादनेन कर्मकाण्डं पर्यवसितं एवं श्रीरामतत्त्व
निरूपणार्थमेव प्रवृत्तं छन्दरप्रवृत्तेः प्रतिपलं स्फुरत्तरमानन्दप्रदं श्रीरामतत्त्वनिरूपणं च ज्ञानकाण्डं पर्यवसितं तद्वत्सोपाधिकब्रह्मध्यानरूपेणोपासनाकाण्डं पर्यवसितं तत्र तत्र भक्तिप्रसङ्गेन किं बहुना का
ण्डत्रयप्रतिपाद्यमर्थं हरिरूपसाधनभूतक्रियायोगनिरूपणेन च कलिमलोन्मूलनं तत्त्वं स्फुटमभिदधानमतः पवसस्य सत्यकृतिसारार्थसन्दर्भभूतं सारं पृष्टं तथा साधोविद्यते न तु एतत्सादरम् पु
रा त्रिपुरहन्तारं पार्वती भक्तवत्सलम् १ श्रीरामतत्त्वजिज्ञासुः पप्रच्छ विनयान्विता प्रियायै गिरिशस्तस्यै गूढमाख्यातवान्स्वयम् २ पुराणोत्तमम् ध्यात्मरामायणमितिस्मृतम् तेषां ध्यायनमात्रे
णजनानां स्यसमिसङ्गतिम् तावद्विजृम्भते पापं ब्रह्महत्यापुरःसरम् यावज्जगति नाध्यात्मरामायणमुदेष्यति ४ तावत्कलिमहोत्साहो निःशङ्कं संप्रवर्तते यो ५ तावत्त्वरूपं रामस्य दुर्बोधं मह
तामपि या ६ अध्यात्मरामायणतः श्लोकं श्लोकार्द्धमेव वा यः पठेद्भक्तिसंयुक्तः स पापान्मुच्यते क्षणात् योगापतितः ध्यात्मरामायणमहर्निशम् प्रीताः तस्य प्रतीत्य त्रि देवाः इन्द्रमुखैः सुराः
८ पठेत्प्रमदमध्यात्मरामायणमुपोषितः यद्यत्करोति सत्कर्म तत्तत्कोटिफलं भवेत् ९ एकादशीदिने ध्यात्मरामायणमुपोषितः यो रामभक्तसदसि व्याकरोति नरोत्तमः १० प्रत्यक्षरं स गोयत्री
पुरश्चर्याफलं लभेत् वक्तव्यं किमिहोक्तेन षण्मुखनारद तत्त्वतः ११ श्रुतिस्मृतिपुराणेतिहासागमशतानि च अर्हन्ति नाल्पामध्यात्मरामायणकलामपि १२ यो भक्त्यार्चयते ध्यात्मरामायणम्
तद्दिनः दिने दिने अश्वमेधस्य फलं तस्य भवेन्मुने १३ नमस्करोति यो ध्यात्मरामायणमहर्निशं सर्वदेवार्चनफलं स प्राप्नोति न संशयः १४ इत्याद्यनेकब्रह्मवैवस्वयमभिहितप्रभावातिरेकं
यथाकथंचित् त्वय्युत्सवणापठनमात्रेणापि निःशेषकलुषततिसन्मूलनसर्वकरसमस्तपुरुषार्थप्रदं चरितं रघुनाथस्य शतकोटिप्रविस्तरं एकैकमक्षरं पुंसां महापातकनाशनमिति विष्णु
मित्रेणापाव प्रमाणतः परिगणितसमस्तरामायणशिरोमणिमध्यात्मरामायणं शिवेनपार्वतीं प्रति प्रोक्तं कलिमलापहं तच्चेतसां स्वर्गापवर्गसिद्ध्ये लघूपायत्वेन प्रतिज्ञाय ब्रह्मा तथाह
ष्टेन नारदं प्रत्याविष्कार तस्य चराणमायणस्य प्रतिज्ञातोपयर्ययालोचनो चेतयामायणस्यकृत्त्नमयाकृतं तत्र चरामहृदयादौ तत्र तत्र सहेतुपतः कृतसोपनिषत्तिपादितश्रीरामतत्त्वनिरूपण

आदिहितायान्नाना अर्थमिमिदधानमिति मनेनाते यः

प्रसिद्धानामध्यात्म रामायणमितिने नान्वयः=

एस्याक्षमयत्वं तस्यापि च सद्गुणोपासनचरित्रनिरूपणसंभिन्नत्वेन चास्फुटत्वं च मन्वानस्तत्रैरामायणे दिनमात्रे लौकिकपरायणां स्फुटत्वेन मधायतो निरूपितं निःशेषोपनिषदां निधानं श्री
श्रीरामतत्त्वम् श्रीरामगीतायाम् आपन्नताशायनिना रद तत्रप्रथमप्यं हे लोके मार्गमाणोपि सर्वदा १ रामेणोपनिषत्सिन्धुमुन्मथ्यामलं हितो मुदा लक्ष्मणाय प्रतिजं गीतामृतधारापीत्वा मरोमवेत्
२ जमदग्निसुतः पूर्वं कार्तवीर्यवधेच्छया धनुर्विद्यामभ्यसितं महेशात् त्रिकेवसन् ३ यथीयमानां पार्वत्या रामगीताप्रयत्नतः श्रुत्वा शूली तां स्वपवन्नारायणकलामगात् ४ ब्रह्मदत्याहुतिप्राणो
निष्कृतिं यदि वाञ्छति रामगीतां सम्यग्जपेत् तामुच्चार्यं तेन यः ५ दुष्प्रतिग्रहदुर्भोज्यदुरालापादिसंभवम् पापं संकीर्तनेनैव रामगीता विनाशयेत् ६ शालिग्रामशिलाग्रे च तुलस्यश्वत्थसन्निधौ य
तीनां पुरतस्तद्वद्रामगीतां पठेत्तु यः स एवैतद्भवेत्साक्षात्सर्वदेवैश्च पूज्यते फलमवाप्नोति यदाचोपि नगोचरम् रामगीतां पठन्भक्त्या स्नात्वा देशे भोजयेद्द्विजान् ८ तस्य तेमिततरस्मिन् वर्यात्रिविश्वासः परंपद
एकादश्यां निराहारो नियतो द्वादशीदिने ९ स्थित्वागस्त्यतरोर्मूले रामगीतां पठेत्तु यः स एव राघवः साक्षात्सर्वदेवैश्च पूज्यते ९ विनाध्यानं विना दानं विना तीर्थावगाहनम् रामगीतां नरोधी
यन्नदन्न फलं लभेत् ११ श्रीरामगीतामाहात्म्यकृत्स्नं जानाति शङ्करः तदर्द्धं गिरिजा वेत्ति तदर्द्धं वेद्म्यहं मुने १२ यज्ज्ञानानन्तमेक लोकः स्मृतहृद्गुद्धिमवाप्नुयात् इत्थं च यमुदीरितानुभावविषय
ं श्रीरामचन्द्रेण स्वयं लक्ष्मणायोपदिष्टं सद्गुणवर्जीवन्मुक्तिपद्धतिरोहणसोपानपङ्क्तिभूतां श्रीरामगीतां निवेशयामास तत्र तावदस्य कथायामेतावान्पि सीतारहितः प्रजापालनतद्विद्धासनरतः केवलस्यादि
देवः सत्प्रपन्नमनोगाननिवालाविरक्तोऽपि नित्रतो भूस्मृतिसेविनाद्भिरिक्तवात् राज्यम् आकारं त्यक्त्वा सविनिरेखाभूतनमोगत्यागादिनाश्च निसाहस्रवर्षाणि सम्यग्राज्यमेव कृतवान् निर्माणोदयामाह ।
ततो जगन्मङ्गलमङ्गलात्मनाविधाय रामायणकीर्तिमुत्तमाम् चचार सर्वाचरितं रघूत्तमो राजर्षिवर्यैरपि सेवितं यथा १ ततः सीतापरित्यागानन्तरं रघूत्तमो जगन्मङ्गलमङ्गलात्मना तस्य सर्वाचरि
तं धर्मं चचार कृतवान् नियमवयः वेदविप्रास्त्यागावीदृद्धिधर्मादि कृतवान् मङ्गलानि जगन्मायुर्धर्मो मोदः प्रजायन्तरति जगन्मङ्गलानामपि सर्वेषां हृद्दि रतवान्मङ्गलः न्नितेनात्मनापदैः कर्तुं तस्या
दिशिरावचरितेन राज्यपतद्दानादिप्रवर्तनमितिपोषणमास समासः तुभयथापि सर्वाचरितं चचारेत्यतः यथापूर्वं रावचरितं तथा चचारेत्यनुकृतिमात्रस्य लाभात्सर्वेषां तत्फलात्त्वरकत्वेन सम्यग्धर्मान्तु
ष्ठानं श्रीरामचन्द्रस्य तु तदभावात्किञ्चिच्छिथिलं स्यादित्यत आह यथेति विधिवदित्यर्थः यथा पूर्वकैश्चरितं तथैवेत्यवधारणं वा नन्वस मधा दुमयं प्राप्त सद्दर्शयन्नेव यः स पुनः सम्यगेतत्
स्वतन्त्रश्चेत्रसीहृतीतिजिज्ञासोः स्वानन्दरसिकस्य विदुषश्च क्लेशप्रदकर्मत्यागात्सर्वेभ्यस्य प्रसिद्धत्वाच्छ्रीरामचन्द्रेणापि वचसैव लोकोपदेशो विधेयः किं लोकसंग्रहार्थं तदनुष्ठानेनेत्येत्यत
आशङ्क्य पूर्वं विदितस्य निर्देशेनानुष्ठानं विना लोकसङ्ग्रहस्य दुःसंपादत्वं धनयति राजर्षीति राजानश्च ते ऋषयश्च विदेहजनकप्रभृतयस्तु निष्कामधर्मे ब्रह्माभ्यासमरवान् उपमितवा ब्राह्मदिभिरिति स
मासः तेषु वर्या जीवन्मुक्ता इत्यर्थः अपि शब्देन तेषां विधिकिंकरत्वाभावस्कोरणात् तैरपि सेवितम् अन्यथा लोकसंग्रहस्याशक्यत्वात् तथा च भगवान् न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गि
नाम् जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्निति राजर्षिवर्यैरपि यथा लोकसंग्रहार्थं सेवितं तथा चचारेत्यन्वयः तत्त्वज्ञानिनां संस्थाहो लोको द्विविधः सन्मार्गवर्ती असन्मार्गवर्ती च त
त्राद्यः शिक्षोपदेशमसदाचारानुसारितया मुच्यते भक्तश्चेत्तत्सजातिनाभीष्टं प्राप्नोति तथा च श्रुतिः यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् तं तं लोकं जयते तांश्च
कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम इति स्मृतिरपि यद्योको ब्रह्मविद्भक्तो जगत्पर्ययते खिलम् तस्माद्वत्स विदेदेयं यथास्ति वस्त्वकिंचनेत्यादिः तत्र स्य श्रेष्ठत्वस्य श्रेष्ठधुरीणस्य ज्ञानिनः स
दाचारमनुसरति असन्मार्गवर्ती तत्रदृष्टिपातेन पापैः प्रमुच्यते तथा च स्मृतिः यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैरिति एतस्य सदाचाराभावेन
तेषां सदाचारमेवरोचयेयुः तथा चैतेषां तद्द्वेतसास्वार्थभ्रंशः स्यात् तद्देहान्तस्तु कृतदुष्कृतानामज्ञानात् भवति तस्मिंस्तु विदिस्वयं संभाविते तदुष्कृतं शक्यतामिति तथा च श्रुतिः तस्य पुत्रा दाय
मुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति ननु श्रीरामचन्द्रस्य देवकार्यार्थं स्वीकृतमायामानुषदेहस्य कथं चरितानुचरणं अवकाश इत्यत आह विधायेति देवकार्यं भूतेन राव

पादेयं जिज्ञासुना वश्यं वर्णरागादिरूपनचित्तविक्षेपनिवर्तकत्वेनोपादेयं तत्र विदाचरतनयेवजीवन्मुक्तत्वं तल्लक्षयो ^२

रा॰ गी॰ टी॰ २ णादिवर्द्धनेनात्र श्रीरामायणे नृपकीर्त्तिविधायसंपाद्येऽस्मर्थः तदनन्तरं च तथाचरणेन त्रैलोक्यसुखावहधर्मदृढीकरणमप्यावश्यकमेव किंचात्र रागिणां रागादिदोषपोषित्वापादनेन तस्या
स्तु जिज्ञासोदयात्तु फलतयोदर्शनीयं जीवन्मुक्तस्य तु रागद्वेषभयादीनामत्यन्तं परतन्त्रयोत्त्वसमवदप्ययुक्तः सजीवन्मुक्तइच्यते न तु मुक्तो तस्यस्वभावसिद्धवत्समारण्यागकर्मयोगासिध्या
न यथा प्राप्तव्यवहारपरत्वमक्रमं रागादिदोषस्पर्शदोषचित्ते न कर्त्तुमायातिन्तदर्थं तदानीं तत्रागाद्याभासेऽपि सदाचरणलक्षणं चिन्नविक्षेपान्तन्तु फलतयावेदनीयमिति लोकोपदेशार्थमेवृच
चारद्वीचरितमित्यादि सर्वेशिक्षानुसारितानिरूपणेन प्रदर्शितम् प्रन्यथा भीरामचन्द्रे भगवति निरूपणमप्रयोजनं स्यात् नहि ब्रह्मवीचरितत्वादयं धर्म इति निर्णीयाचरितव्यानिति निर्णय
द्योतनार्थं तत्संभवति सर्वज्ञत्वात् नापित्तवर्थम् स्वतएव सर्वोत्कृष्टत्वात् नाप्यविदितानां चरणनिषेधार्थम् तद्धुक्तायामप्यभावात् तत्कालेऽपि मेणपरेण राज्यमित्यादौ वृक्ष्यमेतत्वेतो ददृष्ट
दृष्टान्ताऽत्तोचित्याह नवनयापि लोकसंग्रहार्थत्वेन यथाप्राप्तत्वबाधः सत्सदृशसेवितत्वेन तस्यापि यथाप्राप्तत्वात् न च रागादिव्यापारदर्शनेन तद्बाधः मिथ्यादोषरागादित्वात् तस्यापि य
थाप्राप्तत्वात् किंतु दोषहस्तादिनारागादीत्रित वत्तोरागाद्याभासेर्ष्यापारंप्रसाधयतः सर्वेष्टसिद्धिरिति सिद्धम् इदानीं विस्तरेण पाल्यत्वयमवक्ताग्रिमकथावैराग्यार्थं स्मारयति महा
देवः ॥ सौमित्रिणा पृष्टउदारवुद्धिना रामः कथाः प्राह पुरातनीः शुभाः राज्ञः प्रमत्तस्य तु गस्य शापतो द्विजस्य तिर्यक्त्वमथाहराघवः ।२। सौमित्रिणा लक्ष्मणेन पृष्टः सन् रामः कथाः प्राह उत्त प्रोक्तवान्
रवुद्धिनेति तात्पर्यावर्णार्हसहितवाक्यार्थग्रहणधारणक्षमवुद्धितत्त्वरूपस्ययोग्यत्वाय उक्तवन्तं राघ पुरातनीः चिरकालिकाः तेनादरणीयता लक्ष्यते शुभाः शुभावहाः वुद्धिपुण्यप्रोत्रस्येव
2 दत्वात् ताश्च रामायणे त्र प्रसिद्धा यथा इक्ष्वाकुतनयो राजा निमिर्नाम महायशाः स विवर्धान्तमाहूय सत्रारम्भं चकार सः १ वसिष्ठेन तदा प्रोक्तः शक्रेणाहं वृतः पुरा तदन्तरं प्रतीक्षस्व सो
ऽपि गौतममाचेयत २ इन्द्रयज्ञे समाप्ते तु वसिष्ठः पुनरागतः सत्रं समाप्तं निमिनां स तत्रोपविवेशवान् ३ ततो वसिष्ठः क्रोधेन सस्मृतमशपत्तदा भविष्यसि विदेहस्त्वं दर्शनं न ददौ स्वपत् ४ प्रबु
द्धस्तु निमिः शापं श्रुत्वा संक्रोधमूर्च्छितः उवाच ज्ञानतः स्वप्ने मयि क्रोधेन मुक्तवान् यस्माद्धोरतरं शापं तस्मात्त्वमपि निर्वेशः भविता शापवाक्योपि वसिष्ठस्तु निरङ्गकम् ६ वायुभूतो वसिष्ठस्तु शरीर
ग्रन्थनदायुयो सन्नलोके स्वपितरं प्रणतो वाक्यमब्रवीत् ७ विदेहो निमिशापेन कृतोऽहं देहसम्भवे प्रसादं कुरु वीतिशोक्ता ब्रह्मा तेजनिमब्रवीत् ८ मित्रावरुणयोस्तेजः प्रविशेति ततो मुनिः ब्रह्मा
णमभिवाद्याशु प्रययौ वरुणालयम् ९ तदैव मित्रावरुणौ क्षीरोदमुपसंगतौ यदृच्छयोर्वशी ताभ्यां पितृ आगमद्याप्सराः १० ततो मित्रोऽब्रवीदेनां क्रीडन्तीं वरुणालये शुभेमारमयस्वेति सापि तं प्रत्युवाच तथा
करोत् ११ मयासद्दूरमस्वेति वरुणोप्यब्रवीदिमाम् सोवाच्याहं स्मृता पूर्वं मित्रेण त्वं कथं भजे १२ वरुणश्चाब्रवीत्कामपीडितोऽस्मि न्तु ईश्वरे इदं तेजः समुत्सृज्य भावं मयि समुत्सृज १३ साप्युक्ता तत्कृते
भावोदेहोमित्रस्य च प्रभो इति स्त्रीकृत्य मित्रस्य गतासो पुनरन्तिकम् १४ ततो मित्रस्तु संक्रुद्धः प्राह त्वं महती कथम् अन्यवृतवती दुष्टे तन्नोऽशुवि चिरं वस १५ बुधस्य पुत्रो भूभर्त्तो नभविष्यति पुरूरवाः इति
शापेन तत्र पपात सोर्वशी मुनिना १६ तस्याजसे तु तः श्रीमानायुर्नाम महावलः तदृशोयस्य पुत्रस्तु बभूवेन्द्रसमद्युतिः १७ वर्णमेन तं रेतः कुम्भे हव्यया शातवर्षसहस्राणि येनेन्द्रत्वं प्रशासि
तम् १८ यः सक्रम्भस्तु सोमित्रे मित्रावरुणतेजसा पूर्णस्तस्मादुभौ विप्रौ सम्भूतौ सूर्यतेजसौ १९ अगस्त्यस्तत्र भगवान् सम्भवायुजो मुनिः नाहं पुत्रस्तवेत्युक्त्वा तस्मात्कुम्भादपाक्रमत् २० यत्तुनेजस्तु
मित्रेणवर्त्स्यं प्राग्वेमाहितम् तस्मिंस्तदेभवत् कुम्भे वसिष्ठो भगवान् मुनिः २१ तमिक्ष्वाकुर्महातेजा जातमात्रमनिन्दितम् वव्रे पुरोहितं सौम्य वंशस्यास्य भवायनः २२ निमिस्तु वायुभूतस्य शरणदेहसं
स्कृतम् ततस्ते याजयामासुर्योगहीनं महर्षयः २३ तं च देहं रसद्रव्यैर्गन्धमाल्यैः सुपूजितम् ततो यज्ञसमाप्तौ तद्देवास्तत्र समागताः २४ सुप्रीतास्ते तदा सर्वे निमेरात्मानमब्रुवन् वरं वृणीष्व राजर्षे
किं तेजन्मविधीयताम् २५ ततो वसेर्घने त्रेषु सर्वं प्राणमिति सोऽब्रवीत् तथेत्युक्त्वा गता देवा वायुभूतस्तस्मो दिशु २६ ऋषयोपि महात्मानो निमेर्देहं महं स्थिरे मन्थेषुर्द्रावणेनेर्मध्यात्तदुद्जायत २
२६ पुत्रो मिथिरिति ख्यातो जननाज्जनकस्तथा स विदेहो भवद्यस्माद्विदेह इति चोच्यते २८ तस्माद्विदेहराजनकाः प्रोच्यन्ते तस्य वंशजाः ख्याताः प्रत्यक्षतो ग्रेष्ठाः समाजेवपरायणाः २९ नेषा मिथिः स

सर्वैर्भक्षितेनासौ शिथिलोऽभवत् एवं श्रुत्वा निकाकुत्स्थस्तं लक्ष्मणः प्रत्युवाच ह २० कस्मात्तत्तातत्वाज्जाताजादी तास्यो पितृनिर्भिन्नौ उवाच रामः सर्वं श्रुत्वा तत्त्वमालभ्य तेन च २१ ययातिस्त्रियेऽलेवत्तात्र
नहुष= शुक्रस्य तनुजा तं मधुपस्यस्तनो वीर्यं ययातिरिति विश्रुतः २२ शर्मिष्ठा देवयानी च भार्ये तस्य महात्मनः वृषपर्वसुता शर्मिष्ठा शुक्रपुत्री तथापरा २३ देवयानीप्रियालाभात्तस्य तां दुःखितो यदुः पुत्रः प्राह
स्वतातसितं शुक्रस्यात्ति दुष्कर्मणः सहस्रैव विषं दुःखमपमानं च दुःसहम् २४ नात्मनोऽसहितो देवि प्रविशावोऽद्य हुताशनम् २५ यदि वा सहनीयं तेमामनुज्ञातुमर्हसि त्वमत्वं न तत्समिष्ये हं मरिष्यामि
नसंशयः २६ श्रुत्वा पुत्रवचः सा तु तस्मारपितरं तदा त्वा त्वानदिष्टितं शीघ्रमायातो भार्गवो मुनिः २७ तां दृष्ट्वा दीनमनसं देवयानीमनेकधा किमेतदिति पप्रच्छ सा च प्राह स्मृता च ता २८ सूक्ष्म
ग्निं जलं वापि विषं वामृतं निर्पुढ व दुःखेनानेन संयुक्ताभजिष्ये तात मर्हसि २९ अनुमन्यस्व मां तात तव्यव तत्ता करोत्ययम् यन्मां राजा न जानीते न चापि बहुमन्यते ४० श्रुत्वा तद्वचनं शुक्रः कोपयातिन दू
षात्मजम् शशाप पापातीव सक्रुद्धो मोहान्मन्त्रनवीयतः ४१ अवजानासि तस्मात्त्वं जरया शिथिलो भव इत्युक्त्वान्तर्दधे पश्यस्तां च प्रययौ मुनिः ४२ मुनेरनिष्टशापात्तु ययातिस्तत्र वान्नृपः ततः प्रोवाच स
यदुं जरेयं गृह्यतां मम ४३ भोगान्भुक्त्वा यथाकामं जरां प्राप्स्याम्यहं पुनः इत्युक्तः स यदुः प्राह पुरुस्तेऽस्तु प्रियः सुतः ४४ भोजनं तैः स हाग्ना स्थितेव गृह्णन्ते तेजरा च वदिष्ट तो दमर्थेषु सर्वे स्थितिः समीरितः।
४५ राजा पापापतत्क्रुद्धस्त्वदशोरात्तसात्मरेः दुर्विनीतेषु पुरुषेनैव रत्यातिमेष्यति ४६ ततस्तपेवाह पुरुं जरेयं गृह्यतामिति पुरुस्तु प्राञ्जलिः प्राह भाग्यमेषामनेन च ४७ ततः संक्रामयामा
स जरां राजा मुदान्वितः बहुवर्षसहस्राणि राज्यं पञ्चास्तथाकरोत ४८ अथ राजा ब्रवीत्सरमानपैतानं वां मम यतः कृतानुपालस्मे भजराज्यं यशाश्वतं ४९ श्रीराम उवाच ततो मिथिलानगराज्ये विवेश
वनमात्मवान् एवं श्रुतस्तेन पापेनि निमिस्तद्वचनत्तमे ५० इत्येवमाद्याः कथाः प्राह रामः अथ प्रकाश्यकारार्थमानन्तर्याद्ये तत्त्वनगकथायां पश्चाड ऋतु नियमः प्रसज्येत स च रामायणान्तर विरुद्धः
एवं तेन्तर्गदापस्य विस्तरो मिदितो मया यत्रास्ति प्रवरो … इति तदत्र इत्येवं कथान्तराभिधानात् तथा च प्रमत्तस्य जातप्रमादस्य रागतोऽन्यस्य द्विजस्य पापतो देहोऽस्ति
यत्र तादृशो नवासं तथा ब्रह्मण्यो धार्मिको राजा नृगो नाम कदाचन पुष्करे श्रुगवांकोटीर्विविधा प्रवसन्नवान् १ तन्मध्ये गतायेवः स वत्सा कामदोहना अद्रष्टं तेन स्व विप्रस्य राजानं चापि च
वान् २ मार्गमाणः सर्गा विप्रो नले भेवद्रु वत्सराम् ततः कनखले हष्टानेनसा विप्रवेश्मनि ३ आगच्छ बहुले त्येवं नाम्ना वा च स गां द्विजः स्वामिनो गोः स्वरं ज्ञात्वा गच्छत् प्रयातमन्वगात् ४ तत्पदज्ञो श्रता
हेतुं क्रियमाणां समीत्यसः द्विजस्तेन त विप्रेण विवादं कृतवान्बहु ५ विवदन्तौ गतौ राजद्वारं गो निक्षिप्य ततः दाप्यमानं नृहली तौ राजदर्शनकांक्षिणौ ६ अहोरात्राण्यनेकानि वसन्तौ क्रोधमीयतुः
दद तस्य तदा राजेऽप्यापं तौ द्विजसत्तमौ ७ अर्थिनां कार्यसिद्ध्यर्थं यस्मात्त्वं न विदर्शनम् तस्मादृश्यो भूतानां कृकलासो भविष्यसि ८ अत्यस्मन्ते यदुकुले वासुदेवो जनार्दनः स ते मोक्षयिता शापात्
तातेनिष्कृतिरत्र एवं तौ शापमुत्सृज्य ब्राह्मणौ स्वगृहं गतौ स राजा शापितेनापमुपभुङ्क्ते सुदारुणम् ९ इत्यादि तदनेन कथास्मारणे राज्यकार्यं प्रधिकतुलत्वं प्रति एतन्मे सर्वमाख्यातं सर्व
कार्यनिदर्शनम् वर्तितं तथा सौम्य यथा दोषो न मेभवेदिति सावधानेन भाव्यमित्युपदेशः तदेवं द्वागन्ताद्दिना सहस्राणि रामे पितृवदनयोः द्वय इति निर्दोषा … वाल्मीकि पजितास्ता तु कुलं वैराग्यं च प्रदर्शितम् कौ
लीनपदे … हरतिपद्वेन तपनाहशास्तु पदेशास्य पूर्वं जापेत्तथा पियोग्यत्वं धन्यते तदेव ससक्ति कं प्रदर्शयितुमिदानीं श्रीराम गीतां प्रस्तौति तत्र लक्ष्मणप्रश्नं तावदवतारयति। कदाचिदेकान्त उपविष्टं तु प्रभुं समर
मालालितपादपद्मः जनेन सौमित्रिरासादितशुद्धभावः प्रणम्य भक्त्या विनयान्वितो ब्रवीत् २। कदाचित्सौमित्रिः प्रणम्य नु मत्तत्त्वम … तपश्चिकेसर्थः इत्यतो योगिनः सोपाधिनिरुपाधिमात्र
मिरसिद्धिरिति रामोद्वये उपस्थितं अधिष्ठानं तथा प्रकारान्तमेकरसं विकारसत्यमित्यर्थः यद्वा प्रकृत्य … अतः सर्वप्रलये … नत्रतत्सदार्थ शक्ति मि
देव सर्वे हि सिद्धो किमीशकल्पनयेत्यत आह प्रभुं सर्वशक्तिप्रवर्तकम् अन्यथा जडानां मायिकपदार्थानां तच्छक्तीनां चाप्रवृत्तिः सज्येत परमेश्वरं वेत्यत्राधिष्ठितं त्वेन नायं दोषः न च तस्य इन्द्रजालिकव
त्सशरीरत्वापत्तिः अलौकिकमायाविनस्तस्य निर्मितो शरीरनिरपेक्षत्वात् अथेन्द्रजालिकस्य स्वव्यतिरिक्तमहारुद्रणादिवाद्यसाधनहीनस्यापि सृष्ट्यादि निर्माणे प्रत्यक्षप्रमाणमस्तिनेत्रहि ब्रह्म
णोशरीरस्यापि मायाविवेमायिनं तमहेश्वरमिति श्रुतिः प्रमाणमस्ति एवं च मायाराशिभिर्जगद्धेव यद्वेन्द्रमाधिष्ठानस्य सर्वोपकारकस्यापि परमेश्वरस्य नवैषम्यादिदोषलेशोऽपि संभावनीयः कथं

तद्वा ना॰ वध॰

रा.गी.टी. २ घमयारीरस्यतु स्वमतिवृहत्वमित्यतआह रमेति रमया लालितेप्रेम्णा सेविते चरणकमले यस्य तं विस्त्रमित्यर्थः तस्य चरजस्तमोभिभूत सत्वोपाधिकस्य जगत्पालनार्थमनेकरूपाणि कुर्वतः प्रकृतेरा
वणवैधापूर्यहापारथिरूपेणप्रतिवद्धत्वसम्भवोस्तीति अयंभावः शुद्धेब्रह्मणि मायापासर्गादावुत्पत्त्यमानो दिशाणि सहस्रानाहस्वशेनएकोहंबहुस्यांप्रजायेयं पालयेयमिने वेद्रूपाः सद्गुःस्याजा
यते यथा पिण्डदेवहृदिप्रविवेदिसेक स्वधालिसमच्छपाधावी शाद्रूपेणाप्रतिवद्धत्वसंभवोनास्ति तथापि पाकाद्यनेकक्रियाशालिनिदेवदत्ते पाचकपाठकादिव्यपदेशावत्पालनसर्जनसंहारव्यापा
२५४ रवत्येक स्मिन्नपिब्रह्मणि क्रमेण सत्त्वरजस्तमः प्रधानोपाध्यवच्छेदेन विष्णुविधिमहेश्वरव्यपदेशोभवति तत्र ब्रह्मणो विष्णुव्यपदेशशालित्वे सर्वोत्कृष्टत्वात्प्रतिवद्धत्वसम्भवोस्त्येवेतिध्वन्यते वस्तुतस्तु यो
गरूढोयंरामशब्दः तथाच योगेनब्रह्ममात्रपरोपि रूढ्या पूर्वोक्तमायाकृततनुजन्यवैशेपलक्षितत्वेनब्रह्माभिधत्ते एवंचोपलक्षणीभूतवैशेषणभक्तियोगदृष्टसदुपदेशादिः सङ्गच्छते तद्भूतकेवलस्वरूप
णसर्वोपनिषत्प्रतिपाद्यत्वेचोपपद्यते एतच्चोभयमध्यात्मरामायणे सर्वत्रस्फुटं प्रतिपाद्यते अत्रगीतायां तत्श्रीरामस्यकैवल्यस्वरूपज्ञानमेवससाधनं निरूप्यते एकान्त्यादिपदानामपि कैवल्यपरत्वं
विद्रूपिममेव यद्वा एकान्तमुपलभ्यास्थितं रहसिस्थितमित्यर्थः एकान्तेकेवलमुपस्थितमनन्यकार्यमित्यर्थोवा प्रभुं सर्वोपकारत्वम् रमालालितपादपङ्कजं सीतारूपलक्ष्मीवियोगेपिस्वयंलक्ष्यास
रुप॰ लादपङ्कजेपासेव्यमानेचरणकमले यस्य तमित्यर्थः किंभूतोलक्ष्मणः आसादिनानिज्यपलजानिष्ठदृभावनानिवैराग्यादिसाधनानियेनसतथा शुद्धब्रह्मभावप्रयेरितिब्रह्मभावनानुकूलत्वेन
तेषामुपादानात् तानिचचत्वारि एकमिहामुत्रार्थफलभोगविरागः सत्वेहिकानां स्रक्चन्दनवनितादिभोगानामामुष्मिकाणां चामृतास्परः प्रभृतिभोगानां वान्ताशानस्येवदोषदृष्ट्या जिहासामात्रपःत
दुक्तम् दोषदृष्टिर्जिहासाचपुनर्भोगेष्वदीनता हेतःस्वरूपकार्याणि वैराग्यस्यविदुःक्रमादिति तत्रवत्यमाणविवेकशमादीनामप्युत्थानादिहेतुरियावास्तवत्वात्संस्थानवहिर्दृत्तितानवादिःफ
च॰ लेस्वयमुहनीयम् वैराग्यादीनांपरमप्रयोजनेत्वविदितेपनिवर्तनेनमनसः प्रवणादिसाधनप्रवृत्तिजन्मात्मसाक्षात्कारतन्निष्ठात्वयोग्यत्वमितिसेयम् द्वितीयंतुनित्यानित्यवस्तुविवेकः सचब्रह्मै
वनित्यंवस्तु विवेकः सचब्रह्मैवनित्यंवस्तुतदन्यदखिलमनित्यमित्येवंरूपः तृतीयंशमादिषट्कम् तत्रचमनोबुद्धिरहङ्कारश्चित्तंकरणमान्तरम् संशयोनिश्चयोगर्वः स्मरणंविषयाश्चमी इत्युक्तचतुर्विध
स्यान्तःकरणस्यान्तःस्ववशतापादनंशमः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानांक्रमाच्छब्दस्पर्शरूपरसगन्धग्राहकाणांज्ञानेन्द्रियाणांवाक्पाणिपादपायूपस्थाख्यानांवचनादानगमनविसर्गानन्दव्यापाराणांक
र्मेन्द्रियाणांचस्ववशतापादनंदमः निःस्पृहीनानामनःकुरणेन्द्रियाणांस्थैर्यमुपरतिः शीतोष्णादिद्वन्द्वसहिष्णुतातितिक्षा चित्तैकाग्र्यभावःसमाधानम् गुरुवेदान्तवाक्येषुविश्वासःश्रद्धा इतिषट्कम् चतु
र्थंतुसाधनेषुसत्त्वेमोक्षेच्छालक्षणम् यद्वाआसादितामुक्तिभावनानुद्दिष्टेनेतिविग्रहः श्रुद्धिस्तुकाम्यनिषिद्धपरित्यागपूर्वकजन्मजन्मान्तरीयनित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानजन्यावगाहि
मलाभावरूपा तत्त्वाववोधानुकूलसंस्कारविशेषरूपावा तद्वत्त्वेन विशेषणेनाधिकारित्वंप्रदर्शितम् तथाचश्रुतिः शान्तोदान्तउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्यतीति भगवाविन
याचितह्तिपदाभ्यां गुरुभक्तिविनयसम्पन्नत्वेतज्ज्ञानाववोधइतिध्वन्यते उक्तंच यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशन्तेमहात्मनइति तथाचात्रेश्रीरामेणास्य
मुपःप्रद्वयापरिपठेन्दुरुभक्तियुक्तोमय्येवसोमलमनाःप्रविलीयतेतेइति किंमुवाचेत्यतआह ॥ त्वंशुद्धबोधोसिहिसर्वदेहिनामात्मास्यधीशोसिनिराकृतिःस्वयं प्रतीयसेज्ञानदृशांमहामते
तेपदाम्बुजप्राहितसङ्गसङ्गिनाम् ४। अहंप्रपन्नोस्मिपदाम्बुजंप्रभोभवापवर्गंतवयोगिभावितम् यथाञ्जसाज्ञानमपारवारिधिंसुखंतरिष्यामितथानुशाधिमाम् ५। हेप्रभोस्वामिन्
श्रीराममांतथाऽनुशाधिशिक्षययथाऽज्ञानमपारंतरिष्यामित्यर्थः किमज्ञानस्यानर्थजनकत्वमित्यतआह अपारवारिधिम् सर्वानर्थसंकुलसंसारसमुद्रात्मनापरिणतत्वेनसह
शत्वेनयावारिधिशब्दप्रयोगः ननुमायापरिणामित्वेनशरीरादिवत्कालतःस्वयमेवनंक्ष्यतीत्यतआह अपारेति आत्मसाक्षात्कारंविनानवसानेत्यर्थः मायायाश्चचिन्मूरूपत्वात्का
लादेस्तत्परिणामित्वेनतत्परिच्छेदकत्वाभावाच्च नचतत्रलोपायभूतानिनिष्कामकर्मोपासनानित्वपूर्वमेवावृत्तिरसीत्यतआह अञ्जसाशीघ्रं निरायासेनेत्यर्थः परम्परयाकथंचिदस्ताना
निवर्तकत्वेपितेषांतेषाञ्चान्तःकरणस्यविविदिषोर्ममविलम्बायासप्रदत्वेनेतप्रतिभानात् एवंचेद्गुरूपसदनंकर्तव्यमित्यतआह अहमित्यादि त्वामेवगुरुमुपसन्नोस्मीतिभावः शिष्यत्वानतिह

नन्वज्ञाननिवृत्तये तत्त्वविदां वसिष्ठादीनां पदाम्बुजं प्रपद्य स्थितं तत्राह योगीति योगिभिर्वसिष्ठादिभिरपि भावितं सेवितम् किमर्थमित्यत आह भवेति संसारभ्रमनिवर्तकमित्यर्थः ननु दशरथात्मज
स्य मम कथमेवं श्लाघा इत्यत आशङ्क्य किमन्यद्वक्तव्यं तत्त्वमसि त्वमेवासीत्यत आह त्वमित्यादि स्वरूपेण बोधोऽसि विज्ञानस्वरूपोऽसीत्यर्थः प्रज्ञानं ब्रह्मेति श्रुतेः तदेवमायोजनं निरस्य चेतनाभासबुद्ध्यादि
निरसनायाह शुद्धेति वक्ष्यमाणक्लेशकर्मादिरूपमलसंस्पर्शशून्य इत्यर्थः तर्ह्यवच्छिन्नसाक्षी जीवः स्यादित्यत आह सर्वेति ननु तर्ह्येकजीववाद्यभिमतो जीवः स्यात् एकजीववादिनस्तु प्रप
ञ्चरूपकार्यान्यथानुपपत्त्या कल्प्यमाना विद्यालाघवादेकैव कल्प्यते तया च तदुपाधिको जीवोऽप्येक एव न चैवं नैयायिकाभिमतयोगिकायव्यूहवत्सर्वानुसन्धानप्रसङ्गः एकत्वमुक्तौ संसाराभा
वप्रसङ्गश्च स्यादिति वाच्यम् अविद्यावच्छिन्नस्य तथात्वेऽनुसन्धानेऽपि तत्तद्देहावच्छेदेन तदभावात् यथा स्वप्नवतः सर्वस्वप्नानुभवेऽपि स्वाप्नतत्तद्देहावच्छेदेन तदभावः स्वप्ने स्वमरणनिर्हरणादेरप्यनुभूयमा
नत्वात् अत एव देहावच्छिन्नस्य पादे सुखं शिरसि मे वेदनेत्यनुभवेऽपि पादावच्छिन्नं शिरोवच्छिन्नसुखदुःखं नानुसन्धत्ते अन्यथा विरुद्धतादृशभवप्रसज्येत एवं सर्वमुक्तिरप्यस्तु संवेसर्वे ह साध
कस्वमहद्ग्रहणानेन सम्यक्समाधेयमित्याहुरित्यत आह अधीशोऽसीति अधिष्ठानत्वेन मायातत्कार्यजातनियामकत्वादित्युक्तप्रायं ननु मम ब्रह्मत्वे मनुष्यशरीरत्वं न संभवेदित्यत आह निराकृतिः स्वयमिति
मायया तथा प्रतीतावपि स्वतो निराकारत्वात् तथा चोक्तं सीतया हनूमन्तं प्रति रामहृदये रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम् मां विद्धि मूलप्रकृतिं सर्गस्थित्यन्तकारिणीम् १ तस्य सान्निधिमात्रेण सृजा
मीदमतन्द्रिता तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यतेऽबुधैः २ अयोध्यानगरे जन्म रघुवंशेति निर्मले इत्यादि कथमेतादृशो निर्विशेषस्योपलब्धिरित्यत आह ज्ञानदृश्यमिति ज्ञानस्य उपनिषत्पर्यालोचनाज
न्यवृत्तेः नेत्रप्रत्यक्तसाधनं येषां ते यां प्रतीयसे प्रत्यक्षो भवसीत्यर्थः तर्ह्युपायसौलभ्ये न सर्वप्रत्यक्षः स्यामित्यत आह यथापीत्यादि यथापीति किं तुर्थे तेन व पृष्ठं वृजे प्राहितो निवेशितः संगभ्रासक्तिर्यैस्ते तत्त्वन्द्र
कारइत्यर्थः तत्सहिताः सक्तिनश्चसन्निहितत्वाद्भक्तानामेवसक्तिनस्तेषां भक्तभक्तानुयायिनां तानेन प्रत्यक्षो भवसि नान्येषामित्यर्थः जन्मान्तरीयभक्त्या विशुद्धसत्त्वस्य तत्साक्षात्कारे अन्यसमभक्तिहीनस्य त
दभावइति भावः १५ । श्रुत्वाथ सौमित्रिवचोऽखिलं तदा प्राह प्रपन्नार्तिहरः प्रसन्नधीः विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणम् ६ ॥ सौमित्रिवचः श्रुत्वा प्रीतो मो विज्ञानं प्राहेत्यन्वयः अ
तिशायितमज्ञानमज्ञानतमः सर्वाज्ञानमूलभूतत्वेनात्माज्ञानस्यातिशयः तस्योपशान्तये निवृत्तये अज्ञानं तमइव स्वरूपावरकत्वादित्युपमितसमासो वा अस्मिन्पक्षे उपशब्दोपसर्गसमर्थत्वं सन्धेरावृत्त्यत्वं वा
अभ्युपगन्तव्यम् विज्ञानस्य प्रामाण्यमाह श्रुतिप्रपन्नं वेदप्रतीतं ननु शौर्यादिकर्मणां तत्क्रियाणामस्माकं विज्ञानार्थप्रवृत्तिरित्यत आह क्षितिपालभूषणम् अपि ... वदाह स्यमित्यमाणत्वात् भूषणस्य शोभाधा व्यं॰
दार्घा॰ धायकत्ववद्विज्ञानस्य हामशौर्यादिगुणानामाधायकत्वादपीतिभावः ६ । श्रीरामस्तत्र प्रदत्तावसर इत्यर्थः विज्ञानस्याधिकार्यादीन्स्तावदाह ॥ आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः सम
प्यतत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये ॥ ७ । आत्मलब्धये श्रवणादिना विज्ञानाय सद्गुरुं समाश्रयेत् तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतेः सद्गुरुत्वोक्त्या
परत्वेन श्रुत्युक्तविशेषणद्वयविशिष्टत्वं द्योतयति श्रोत्रियात्संप्रदायविज्ञानेन संप्रतं ब्रह्मनिष्ठाभवति नेतरस्य असंभावनानिवर्तने केवलब्रह्मनिष्ठात् तज्ज्ञाने नासंभावनानिवृत्तावपि समस्तप्रश्नोद्धारो न जायते न
चात्र विप्रतिपत्तव्यम् विशुद्धान्तःकरणस्य स्वल्पोपदेशेन जातसाक्षात्कारस्याप्यात्मा न विन्दते यस्तु सर्वभूतगुहाशयम् श्लोकेन यदि वा द्वैनक्षीणतस्य प्रयोजनमिति महाभारतोक्तकृतत्वस्यास्य भ्रस्य
गौतमजैमनीयमतद्दूषितान्तःकरणपुरुषकृतप्रश्नोद्धारे पाटवाभावस्य संभावितत्वात् अन्यथा श्रोत्रियमिति विशेषणवैयर्थ्यापत्तेश्च तत्राधिकारिणमाह आदौ समासादितशुद्धमानसः उपात्तसाधन इति
विशेषणद्वयेन समासादितं सम्पादितं शुद्धं मानसं येन स तथा मनसः शुद्धिस्तु रागादिमलाभाववत्पाकृत्यसाक्षात्कारानुकूलः संस्कारविशेषो वेद्यत्वं प्राक् तस्याजनकमाह स्ववर्णेति काम्यनिषिद्धवर्ज
नपूर्वःसरमिति शेषः तथा च काम्यनिषिद्धाभिप्रितस्ववर्णाश्रमविहितकर्माणि कृत्वा तैर्भगवन्नमाराधेत्यर्थः उपात्तानि सापूनानि रहामुत्रार्थफलभोगविरागादीनि पूर्वोक्तानि येन स तथा न त्वन्तःक
विषयेषु रणस्य चित्तमालिन्यहेतुषु दोषदृष्ट्यादिना जायमानानामेषां साधनानामपि अन्तःकरणशुद्धिपरिणामविशेषरूपत्वात्तदीयमेव जनकम् यथाहुः स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् साधनं प्रभवेत्पुंसां
वैराग्यादिचतुष्टयमिति तथा च श्रुतिः तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति धर्मेण पापमपनुदतीति ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इति स्मृतिः कथा
रागादिमलाभावरूपशुद्धिजनकं निष्कामसत्कर्मनदेव शुद्धिपरिणामो वैराग्यादिसाधनजनकमिति = २

पेकर्मभिः पक्के तत्तो ज्ञानं प्रवर्त्तते इति च किं कृत्वा सर्वं सर्वोक्तं तत्क्रियाजातं समाप्य संन्यस्य न तत्करणनिवृत्तीत्यपाकृत्य मनो मोदो निवेशयेदित्युक्तत्वाहुक्तादिकरणापनयनपर्यन्तमनुष्ठायेत्यर्थः यदहरेव
विरजेत्तदहरेव प्रव्रजेदिति स्वैर्निमित्तं वैराग्यसमकालमेव संन्यासविधानात् तद्वाक्यस्य वैराग्यस्य विषयत्वात् संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिता इति वि
विदिषासंन्यासपरवाक्यविरोधाच्च तच्च वैराग्यं त्रिविधम् मन्दं तीव्रं तीव्रतरं चेति तत्र पुत्रदारादिविनाशे धिक् संसारमिति बुद्ध्या तात्कालिकी विषयजिहासा मन्दवैराग्यम् न तत्र शोकात्मके संन्यासाधि
कारः यदा मनसि वैराग्यं जायते सर्वतस्तु तदैव संन्यसेद्विद्वानन्यथा पतितो भवेदिति स्मरणात् अस्मिन्जन्मनि पुत्रदारादयो माभूवन्निति स्थिरबुद्ध्या विषयजिहासा तीव्रवैराग्यम् तत्र यात्रादिसामा
र्थ्ये कुटीचकसंन्यासाधिकारः तदक्षमे तु बहूदकसंन्यासाधिकारः पुनरावृत्तिसहितो लोको मे मास्त्वित्यधुनेति स्थिरबुद्ध्या विषयजिहासा तीव्रतरवैराग्यम् तत्र ब्रह्मोपासनया सत्यलोकजिगमि
षायां हंससंन्यासाधिकारः ततो पि न पुनरावृत्तिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति स्मरणात् मुक्तिमात्रेच्छायां तु परमहंससंन्यासाधिकारः स च परमहंस संन्या
सो द्विविधः विविदिषासंन्यासो विद्वत्संन्यासश्चेति समाप्य तत्सर्वमित्यत्र प्रकृते तु श्रवणमननिदिध्यासनान्तरेवास्य [illegible] वेदान्तवचनादिभिः स्वयं या विविदिषया क्रियमाणत्वादयं विविदिषासंन्यास एव स च
वेदनहेतुश्रवणादैर्विघ्नोपनिहत्तये क्रियमाणो द्विविधः प्रैषोच्चारणपूर्वकदण्डधारणाद्याश्रमरूपो जन्मान्तरापादककाम्यकर्मादित्यागमात्रात्मकश्चेति तत्राश्रमरूपः सर्वे संन्यासाः पारायशीदोऽस्ति नो प्रसि
द्धः त्यागस्तु नैव रीयादीनां प्रसूयते न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति श्रुतेः अत्र च स्त्रीशूद्रयोरप्यधिकारः तथा च मैत्रेयीवाक्यम् येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति
अन्ये च विदुरस्य वा न प्रस्थानं केन चिन्निमित्तेन संन्यासाश्रमस्वीकारे प्रतिबद्धे स्वाश्रमधर्मेषु तु ह्यमानेष्वपि वेदनार्थं मानसो निखिलकर्मादित्यागो न विरुध्यते परसाधनं च तदुपसंपन्नस्यैव वेदनश्रवणादौ
संन्यासश्चैवं कोधिकारो न गृहस्थादेरित्याद्युक्तं तदसत् यत्किंचित्साधनसंपन्नानां श्रुतिस्मृतीतिहासपुराणोक्तानां याज्ञवल्क्यजनकादीनां लोके च तादृशां तत्त्वविदां बहूनामुपलम्भात् अत एव ब्रह्मविज्ञाननि
भायपरमहंससमाकुपः शान्तिदान्त्यादिभिः सर्वैः साधनैः सहितो भवेदिति स्मृतौ धर्मानां संन्यासिसंपादनीयत्वमपि शिष्यते अतोपि च समाप्य तत्सर्वमित्यत्र मेवोपात्रसाधनरतिपद्यते त्तिनिपातभूष
णमिति विज्ञानविशेषणं च न तस्य विशुद्धान्तःकरणस्य यत्किंचित्साधनसंपन्नस्यापि वैराग्योदयमात्रेण न एवं विषये [illegible] प्रवणाद्यधिकार इति सिद्धम् ।७। इदानीमज्ञानस्पहेतुत्वप्रदर्शनाय तत्कार्य
संसारक्रममाह क्रियाशरीरोद्भवहेतुराहता प्रियाप्रियौ तौ भवतः सुरागिणः धर्मेतरौ तत्र पुनः शरीरकं पुनः क्रियाश्चक्रवदीर्यते भवः ८। सुरागिणः [illegible] यो प्रियाप्रियौ तौ क्रियाक्रियाप्रवर्त्तकौ भवतः इति तत्
हमहिंसाद्युपाहारेणान्वयः रागस्तु पतञ्जलिना सुखानुशयी राग इति सूत्रेण सुखमनुशेते सुखस्य सुखानुस्मृतिपूर्वकं तत्साधने [illegible] हृदि वर्तते स राग इत्यर्थः केन [illegible] सुखसाधनसमर्थः
न [illegible] सोस्यास्तीति स रागी तस्य प्रियः सुखसाधनत्वेनाभिमतो पेक्ष्यः शरीरादिः तद्विघातकश्च शत्रुसर्पादिरप्रियः तद्विघातेन रागस्यैव द्वेषरूपेण परिणतत्वात् द्वेषो रहते अत एव [illegible]
गीतायाम् काम एषः क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणमिति कामक्रोधयोरभेदः [illegible] अनायुर्हतमिति वक्रियाशब्दस्तेह तो लाक्षणिकः उपेत्यस्य स्वतन्त्रत्वान्तच्चेणा क्रियाहेतवु
भ्र क्रियायाश्चनर्थहेतुत्वमाह शरीरोद्भवहेतुः जन्मप्रदायिनीत्यर्थः ननु तत्त्वज्ञस्येवाज्ञस्यापि क्रिया जन्महेतुर्न स्यादित्यत आह आहता अहंकारो मीत्यभिमता तत्त्वज्ञस्य तु नयाभिमानाभावान्न जन्महेतुर्भवती
ति भावः ननु कृतप्रध्वस्तायाः क्रियायाः कथं जन्महेतुत्वमित्यत आह धर्मेतरौ तत्रेति तत्र क्रियया माहृताया धर्माधर्मौ भवतः तौ च विहिताविहितकर्मोत्पन्नानजन्यौ वह्णादिशाख्याभिधेयौ फलोदयपर्यन्त
स्थायिनौ संस्कारविशेषौ तत्पावितिन विरोधः तत्रेत्यनुवर्त्तते तत्र धर्माधर्मसन्निधौ पुनः शरीरकम् शरीरस्यानेकानर्थजन्मभूमित्वेन कुत्सायां कन् तत्र शरीरे पुनः क्रिया भवति प्रारब्धरूपायाश्चपि क्रियायाः सुरागि
णो भिमानवशेनाहृतहेतुत्वात् क्रियमाणकर्मत्वम् तत्रैवं सुरागिणो जन्मक्रियापरंपरावशं भावेसति भवः संसारः चक्रवत् ईर्यते प्रेर्यते घटनिर्माणप्रवृत्तस्य कुलालस्य चक्रं यथाभ्रमत्येव तथा संसारो न वि
रमतीत्यर्थः यद्वा सुरागिणः शरीरोद्भवहेतुः प्रारब्धापन्नाया क्रिया साश्चाहृता सती तौ प्रसिद्धौ प्रियाप्रियौ भवतः शुभाशुभहेतू भवतीत्यर्थः शरीरोद्भवो हेतुर्यस्याः इति विग्रहः अस्मिन्पक्षे प्रियाप्रिययोः सत्हेतौ लक्ष ४ शुभाशुभ
णा कल्प्य शुभाशुभहेतुत्वमित्यत आह धर्मेतरौ तत्रेति अन्यत्सर्वं पूर्ववत् ८। अज्ञानमेवास्य हि मूलकारणं तद्ज्ञानमेवात्र विधौ विधीयते विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ।९। द्वियस्मा

त् अस्य सर्वानर्थरूपसंसारस्य मूलकारणम् अज्ञानमेव मायैव वा तत् तस्मात् तन्नाशे मुक्तावेवविधो पुरुषार्थस्य हि यद्विधायकं वेदेन ज्ञानमेवाज्ञाननाशोपायत्वेन विधीयते नान्यत् तन्नाशस्यैवानर्थले-
शासंविद् मोक्षरूपपरमपुरुषार्थसाधनत्वादिति भावः कारणं तु अनन्यथासिद्धनियतपूर्ववृत्ति तद्द्विविधम् निमित्तमुपादानं च तत्र कार्यानुकूलव्यापारवन्निमित्तकारणं कुलालादिः कार्यान्वितं
तु उपादानकारणम् तच्च विवर्तस्य परिणामस्य चेति द्विविधम् आद्यं रज्जुसर्पादेर्मृद्घटादिः द्वितीयं तु वस्तुतोऽन्यथाभावे दध्यादेर्दुग्धादिः ब्रह्म तु स्वमायया तथा तथा विवर्तमानमुपादानं साक्षितया
मायाविविक्तं तत्परिणामप्रपञ्चोपादानं [illegible] चलने अयस्कान्तवन्निमित्तमपीति [illegible] प्रकृतेस्तु मायायाः परिणामो जगदिति मायोपादानकारणमेव शाखादिकं प्रतिबिम्बस्येव घटादिकं प्रतिबिम्बादेः
कारणत्वेपि मूलस्य सर्वस्य तत्प्रतीविनिखिलप्रपञ्चप्रतिमायायाः कारणत्वात् [illegible] मूलेति मूलोच्छेदं विना [illegible] त्रिगुणः पुनः यथा लतास्तथा विषमत्वाज्ञानप्रशमं विना अतएव पूर्णं शतसहस्र
तु तिष्ठन्त्यव्यक्तचिन्तकाः दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः १ भौतिकास्तु प्रातपूर्णं सहस्रं तत्वाभिमानिकाः बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः २ पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते इति
पुराणे व्यक्तादीन् पुरुषभुक्तोपासितवतां पुनर्जन्माभिधाय पुरुषं निर्गुणं प्राप्य कालसंख्या [illegible] मित्यादिना पुरुषसाक्षात्कारेण मूलाज्ञाननिवृत्तिमतः पुनर्जन्माभावः प्रतिपादितः ननु संघातादिवादिमतेषु
सत्सु कथं मायामयत्वं जगतः यथा संघातवादो लौकायतिकानां नास्तिकानाम् अनादौ क्षणिके लोके ईश्वरादिरपेक्षते प्रमत्तसंघातभेदशक्तिभिः सर्वसिद्धितः १ यथौषधानां संघाते मादो रागोऽरसायन
म् तथैवभूतसंघाते चैतन्यं कायजीवता २ यथा चारम्भवादस्तार्किकाणां मीमांसकानां च आत्माकाशादयस्तु [illegible] तः कारणं [illegible] मिघाते कुलालादिवद् [illegible] घटवज्जन्मनाशभाक् १ पृथिव्यम्भोग्निवायूनां
कर्मसंयोजिता अणवः द्व्यणुकादिक्रमेणारम्भन्त्यखिलं महत् २ यथा च परिणामवादः सांख्यपातञ्जलपाशुपतानां [illegible] प्रधानं स्याद् गुणाः सत्त्वं रजस्तमः सुखदुःखमोहरूपं [illegible] तद्धि स्फुटं जगत् प्रधा
नस्य महान् सोऽहंकारः [illegible] भूतात्मना जायते पञ्चतन्मात्राण्येतान्येकादश [illegible] तन्मात्राणि तु भूतानि जायन्ते तत्संख्यया चतुर्विंशतिरेतानि तत्वानि पञ्चविंशकः सदेव कार्यं गुणतः पूर्वकारणरूपकम् १
आविर्भावतिरोभावौ जन्मनाशावुदीरितौ ४ यथा च जीवोत्पत्तिवादः पाञ्चरात्राणाम् ब्रह्मणो वासुदेवाख्याज्जीवः संकर्षणाभिधः जायते च मनस्तस्मात् प्रद्युम्नाख्यं ततः पुनः अहंकारोऽनिरुद्धाख्यस्ततो विश्वस्वरूपका
वासुदेवाराधनाद् [illegible] जायते बन्धमोक्षणम् यथा च क्षणिकविज्ञानातिरिक्ताभाववादो बौद्धानां विज्ञानं बुद्धिरिति [illegible] यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासते स्वप्नवज्जाग्रदेतस्य प्राक्भावः स्फुटएव हि १ यथा च बा
ह्यास्तित्ववादो बौद्धैकदेशिनाम् समुदायोऽणुसंभूतो वाह्यो [illegible] आन्तरः स्कन्धजश्चित्तचैत्यरूपश्च तौ जगत् १ मृदम्बुवह्निवायूनां [illegible] स्निग्धोष्णचञ्चलाः चतुर्धा त्वणवः पञ्चस्कन्धा रूपादिभेदतः २ च
[illegible] विज्ञानमुच्यते वेदना सुखदुःखे संज्ञा [illegible] संस्कारो वासनाश्चैव [illegible] संहत्यात्मकम् जगत्तत्तत्तः सिद्धं किमन्यपरिकल्पनैः २ यथा च सप्तपदार्थवाद आर्हतानां जीवा
जीवात्मकं विश्वं चेतनः स्वशरीरवत् परिणामावयवान् जीवः षड्विधः स्मृतः १ महीधरादिकः स्यात् [illegible] आस्रवः संवरो निर्जरो बन्धो मोक्षएव च २ इन्द्रियाख्यो विवेकादिः केषाञ्चिद् दिविस्तृ
पः [illegible] सिद्धिपञ्चानामप्युच्यते स्यादस्तीत्यादिना सप्तभङ्गीवाक्येन वादिनः [illegible] कर्मयोगाभ्यास सम्मतं साधयेत्सुधीः ४ सत्त्वासत्त्वोभयावाच्यवादिनः [illegible] द्विधा [illegible]
दिनः सप्तकीर्तिताः ५ इति चेन्नैवम् तेषां वादानां प्रमाणानपेक्षत्वात् [illegible] मूलत्वाद् [illegible] प्रमाणबाधितत्वाच्च तथा हि तावत्संघातवादेन युक्तिसहः घटोपलब्धिवत् संघोपलब्धिर्घटेत [illegible] साजीवो
मम देहोऽयमिति भेदानुभूतितः योगिनश्चाप्यभूतादेर्देहान्तरगतिः स्फुटम् २ आत्माभावे कृतध्वंसो [illegible] भागमस्तथा २ क्षणिकान्नो कार्यजन्मसहकार्यप्रतीतितः सहकारित्वतीताया [illegible]
ईश्वरं [illegible] समर्थयामास अजन्मानो लोकाः किमवयववन्तोपि जगताम् अधिष्ठाता [illegible] भवविधिरनादृत्य भवति अनीशो वा [illegible] जनने कः परिकरो यतो मन्दा [illegible] समरवर संशेरते
मे इति यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्ब्रह्मेत्यादि श्रुतयस्तु स्वतन्त्रमेव प्रमाणम् आरम्भवादोपि न युक्तिसहः यथा अणुसंयोजकं कर्म निर्निमित्तं यदा भवे
त् प्रलयस्तर्हि न भवेत्सनिमित्तं कथं वद १ शरीराभावतस्तत्र प्रयत्नादेरसम्भवात् नित्यतादीशयत्नोपि कादाचित्को [illegible] न हि जीवात्मसमवेतत्वाद् [illegible] सामानाधिकरण्येन विनानो हि
तेनोचितौ एवमादिविचारेण दुष्टा परिकल्पना ३ कुलालवन्नरस्यैवेदीश्वरस्तर्हि तत्समः शरीरोपस्करात् कोऽपि विषमो निर्घृणस्तथा ४ ईशो वेदः प्रमाणं चेन्माज्ञात हितदस्य तां यतः स्फुटनिराबाध
मायित्वं तत्र वर्ण्यते ५ अवश्यं सच्चिदानन्दो जगद्रूपेण भासते मायायोगाद् [illegible] नास्ति किञ्चिन्न दूषणम् हि सा ६ परमाण्वादिकल्पना विरोधिन्यस्तु श्रुतयः एकोऽहं बहु स्यां प्रजायेयेति एतस्माद् आत्मन आका
शः संभूत इति संयोगो नोचितो वयवोक्तितो [illegible] पञ्चयाभावात्कार्योत्पत्तिर्न युज्यते २

[illegible] परिणा मवादि

[illegible]

रा. गी. टी. ५

चः संभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवीति मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति इन्द्रो मायाभिः पुरुरूप ईयते इत्येवमादयश्च संख्यातास्तथा एवं स्मृतीतिहासपुराणवाक्यान्यपि परि
णामवादोपि न युक्तिसहः यथा विचित्रजगतो हेतुर्न प्रधानमचेतनम् चेतनोपि हि निःसङ्गो न सहायतामर्हतीति १ गुणकार्यस्तत्त्वादीनामाकारस्य निश्चयात् घटादावन्वयो नास्ति कथमव्यक्तकार्य
ता २ किंच परिणते तस्मिन्कार्ये यन्निर्न युज्यते परिणामे तस्य नाशः कार्यस्यापि निराश्रयात् न च तत्राजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतिः प्रमाणम् तस्या यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं
तदपां यत्कृष्णं तदन्नस्येति छान्दोग्योक्ततेजोबन्नात्मकप्रकृतिपरत्वेन मायापरत्वेनापि सम्यग्व्याख्यातत्वात् एवमन्यत्स्वयं समाधेयम् जीवोत्पत्तिश्च न युक्तिसहा यथा जीवोत्पत्तिर्न युक्तेयं जीवस्यानादि
ताकृता विनाशे कृतनाशः स्यादकृताभ्यागमस्तथा १ विज्ञानवादोपि न युक्तिसहः यथा विचित्रजगतो हेतुर्न प्रधानमचेतनम् चेतनोपि हि निःसङ्गो जागरे बाध्यते स्वप्नो जागरो नैव बाध्यते न च तदा
ऽधिकाभावाद्बाह्यमस्त्युपपत्तितः १ बहिर्वदिति तेषूक्तिर्बाह्यमर्थं प्रसाधयेत् एवं न युज्यते बुद्धेर्जगदाकारता तव स्थिरचेतनराहित्यात्स्वयं च क्षणिकत्वतः स्मृत्यादिव्यवहारस्य लोपश्च तव दारुणः
बाह्यास्तित्ववादोपि न युक्तिसहः यथा स्थिरचेतनराहित्यात्स्वयं वाचेतनत्वतः न स्कन्धानामपदनावासमुदायो न युज्यते १ सप्तपदार्थीवादश्च न युक्तिसहः यथा एकस्मिन्सदसत्त्वादिविरुद्धप्रतिपादना
त् अपन्यायः सप्तभङ्गी न च जीवस्य सांशता १ अस्यार्थः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः ६ स्यादस्ति च नास्ति चावक्तव्यश्चेति सप्तभङ्गीवा सप्त.
कानि तेषु च स्याच्छब्द ईषदर्थवाची निपातः तदग्रे च एवं पदार्थानां सहासहायुभयवाद्यनिर्वचनीयवादिसदनिर्वचनीयवाद्यसदनिर्वचनीयवाद्युभयानिर्वचनीयवादिनां मतानि क्रमेणाभिहि
तानि ते च वादिनः समागत्यार्हन्तं प्रति किं त्वन्मते मोक्षोऽस्तीत्यादि पृष्टवन्तः तत्रार्हन्तान्प्रति प्रत्येकं क्रमेणैतान्येव वाक्यानि ईषदभ्युपगमार्थकानि पृथक्पृथगेवोत्तरत्वेनाह ते तावता सर्व
वादिनो निर्विषण्णाः सन्तो नोत्तरं प्रतिपद्यन्ते एवं विपर्यस्तोऽसौ सप्तभङ्गीरूपो यं न्यायोऽपन्याय एव अपकृष्टो न्यायोऽन्यायाभास इत्येवमर्थः कुत इत्यत आह एकस्मिन्निति एकस्य जीवपदार्थस्य सत्त्वादिनं प्रति स
द्रूपत्वमसत्त्वादिनं प्रत्यसद्रूपत्वं चेत्येवमादिविरुद्धधर्मप्रतिपादकत्वात् न च जीवस्य सावयवत्वं युज्यते शरीरादिवदनित्यत्वप्रसङ्गात् तदनित्यत्वे मोक्षः कस्य पुरुषार्थः स्यात् तस्मान्न्यायाभासेन सप्तभ
ङ्ग्यात्वेन जीवादिपदार्थानां न सिद्धिरिति ततश्च पारिशेष्यात्सर्वोक्तमायादिभिश्च जगतो मायामयत्वसिद्धिः तदुक्तम् ततो निरंश आनन्दे विवर्तो जगदिष्यताम् भुवस्यान्तरभानेन विवर्तो रज्जुसर्पवत् १ मा
याशक्तिः कल्पिका स्यादिन्द्रजालिकशक्तिवत् शक्तिः शक्तात्पृथङ्नास्ति तद्वद्दृष्टेर्न चाभिदा २ प्रतिबन्धस्य दृष्टत्वाच्छक्त्यभावे तु कस्य सः शक्तेः कार्यानुमेयत्वादकार्ये प्रतिबन्धनमिति तदेवं संसारस्याज्ञानमूलत्वेऽपि
हेऽज्ञाननाशोपायः क इत्यत आह विद्येति तत्राशा विद्योपादानानाशविद्योपायसी समर्था विद्या तथा उपाय इत्यर्थः तथा च वेदे सर्वपदार्थनिषेधनाद्वैकं तत्वज्ञानं तु साधनानि विधीयन्ते तमेव विदित्वाति मृ
त्युमेति नान्यः पन्था विद्यतेऽयनायेति तरति शोकमात्मविदिति आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्येवमादौ अत्र आत्मा वा अरे द्रष्टव्य इत्येष प्रकृतः अस्य आत्मसाक्षात्कारेण मूलाज्ञाननिवृत्तिर्भ
वेदित्यर्थः आत्मसाक्षात्कारः केन भवतीत्यत आह श्रोतव्य इति श्रवणात्कथं साक्षात्कारो जन्यत इत्यत आह मन्तव्य इति मनननिदिध्यासनाभ्यामुपकृतेन यः श्रवणं तत्र उपक्रमोपसंहारावभ्यासोऽपूर्वता
फलम् अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये इति षड्विधलिङ्गैः वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यनिश्चयः फलस्यार्थस्योपपत्तिभिश्चिन्तनं मननम् विजातीयप्रत्ययतिरस्कारेण चेतसः सजाती
यप्रत्ययप्रवाहीकरणं निदिध्यासनं ध्यानमित्यर्थः तदेवाविविदिषन्ति यज्ञेनेत्यस्मापि विशिष्यते न तु तमेव विदित्वेत्यादौ वाग्ययोः सकपालो भवतीत्यत्रेव स्वरूपबलेन लिङ्गादिप्रत्ययं विनैव विध्यर्थमा
विष्पमत्वादीनां सकार्यवर्गीणाह्नो फलत्कत्वादात्मवेदनेनाज्ञाननिवृत्तिं भावयेदित्यर्थोऽभवेदपि आत्मा वारे द्रष्टव्य इत्यत्र तत्वज्ञाननिवृत्तिवाचकशब्दाभावाद्ज्ञाननिवृत्तिः कथं भाव्यत्वेनान्वेतीति चेन्न एव पुंसां
नेष्टाभ्युपायत्वात्किं यास्त्वनयः प्रवर्तकः प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनामिति तत्वप्रत्यायार्थप्रवर्तकविधेरेव भाव्यो ह्यसामान्यात्तत्पक्षत्वात् इष्टविशेषस्यात्मानन्दावाप्तिर्वाऽविद्यास्मितारागद्वेषाभिनिवेशाख्यैः
क्लेशैः पञ्चभिः पाशैर्बन्धस्य ते स्यार्थकारणत्वादेवं मुच्यते स वेधापाप्रेरिति फलत्वेनाभ्युपगन्तव्यः न च सुषुप्तौ कैवल्यमेवेष्टमिति तदेशुभाव्यत्वेनान्वेतुमर्हतीति वाच्यम् तस्य वास्तवत्वेनाजन्यत्वात् अहं ब्रह्मा
स्मीति न ज्ञानान्नास्ति किं च नेत्यादिश्रुत्यर्थानुसन्धानेनाज्ञानभ्रमनिवृत्ते उत्पत्तिविद्वद्भवतीत्यादावनुत्पन्नत्वात् एवं च मोक्षस्य जन्यत्वे विनाशः स्यात् स्वतःसिद्धत्वे तु शास्त्रानर्थक्यं सदानुभवश्च स्यादिति शङ्का ५
पिनोदेति अज्ञानस्यैव कैवल्यानुभवविरोधित्वात् अज्ञाननिवृत्तेस्तु जन्यत्वेपि न विनाशः तस्या अभावरूपत्वात् जन्यत्वस्य भावविनाशव्याप्तत्वाभिमतावेव लिङ्गत्वात् अथवा तज्ज्ञानेनाज्ञाननिवृत्तेरिष्टत्वान्नापूर्वं

विधिः अप्राप्तविधायको ह्यपूर्वविधिः विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयत इत्युक्तत्वात् अज्ञाननिवृत्तौ च साधनान्तराभावेन ज्ञानस्य प्राप्तिकप्राप्तियुगपत्प्राप्त्योर
संभवात् नियमविधिः परिसंख्याविधिर्वापि न शङ्कनीय एव न तस्यानीति फणस्तु वहइए फलत्वाद्धितान इयस्य ब्रह्मणः स्वतः सिद्धत्वेनानुष्ठानाप्रतिपादकत्वाच्च नापि विधिः किन्त्वर्थप्राप्त एव प्रत्ययः विधौ विधी
यत इत्युक्तिस्तु साक्षात्परंपरया वा वेदोक्तसर्वविधिफलत्वेनोपपद्यत इत्याहुः ननु वेदे तद्दानमेव विधीयते कर्म तत्र नित्यादिकर्मापि वेदोक्तत्वादज्ञाननिवर्तकं स्यादित्यत आह नकर्मेति नयतस्तज्जन्म प्र
ज्ञानजन्म आत्मज्ञानं कर्तृदेहाद्यध्यासेन जायमानत्वात् ननु सात्त्विककर्तरि तामभूतायां विद्यायाः वकर्मणोऽज्ञाननिवर्तकत्वमस्त्वित्यत आह सविरोधमिति तिष्ठतु इहैतावदज्ञाननिवर्तकत्वशङ्कापि कि
न्तु विक्षेपकरजःकार्यकर्मदेहाध्यासकर्तृकर्तृत्वाद्युत्पन्नत्वेनाज्ञानेनेद्दृशं त्वम्भतः तन्निवर्तकविद्याभ्यासे सति विरोधमीरितं प्रतिपन्थिकम् इत्यमितिभावः ननु वेदोक्तकर्मणो ज्ञाननिवर्तकत्वाभावे तद्दानमेव
स्तुक्तेन सङ्गच्छते निश्चेन्न तत्र विद्यासाधनसत्त्वशुद्ध्यादिजनकत्वेन कर्मणो विधिपरंपरया ज्ञाननिवर्तकत्वाङ्गीकारात् न च तत्र स्वतन्त्रस्वर्गादिफलश्रवणान्नैवमिति वाच्यम् बालकस्य कटुकौषधपाने प्रवर्तनार्थं
खण्डलड्डुकप्रदानवत् फलश्रवणस्य पश्चात्कर्मप्ररोचनार्थत्वात् एवमेव च श्वेतापिवनाद्यागोत्तमादिमुनिप्रणीतत्वात् वाद्यादिशास्त्राणामपि नास्तिकनिवारणादिप्रयोजनत्वाद्यनिष्टम् इत्याह किमत इदानीं यदन्त्यु
निप्रणीतकामशास्त्रस्यापि शास्त्रोही विनमार्गेणापि विषयभोगे दुःखमात्रपर्यवसानं भवतीति विषयवैराग्यस्फुटमेव प्रयोजनम् तेषां सर्वज्ञत्वात् किन्तु नहि विषयेष्वेव प्रवर्तनाय मा पतिततोपि परमतु
ष्वार्थप्रवणता सम्भवतीति तेषां कथंचित्तत्साधिपधस्यादिति तेषां स्वतो निन्तात्पर्यम् तदनुष्ठाने वेदविरुद्धेपि सहेतुत्वाद्यर्थे तेषां तात्पर्यग्रन्थस्य मूर्खेरास्तन्मतमेवोपादेयत्वेन गृह्यन्ते न विद्वांसइति तदेवं कर्म
दीनामपि सत्त्वशुद्धिनास्तिक्यनिवृत्त्यादिद्वारा बहिर्मुखानां परमपुरुषार्थप्रवणतासम्भवतीति मत्वा यादेन तत्परंपर्या ताननाशपवपरं प्रयोजनमिति सिद्धम् ॥ नाज्ञानहानं न च रागसंक्षयो भवेत्ततः
कर्म सदोषमुद्भवेत् ततः पुनः संसृतिरप्यवारिता तस्माद्बुधो ज्ञानविचारवान्भवेत् ९। तस्मात्कर्मणोऽज्ञाननिवर्तकत्वाभावात् वस्तुतः सदोषत्वेन संसृतिप्रवर्तकत्वाच्च हेतोर्बुधः कर्मदोषाभिज्ञः यद्वा
बुधः सत्त्वशुद्धिवैराग्यादिना लब्धविचारसमर्थः पुरुषः ज्ञानविचारवान्भवेत् ज्ञानं सर्वं खल्विदं ब्रह्म नेह नानास्ति किंचन नेत्येवंरूपम् विचारस्तु तदनुकूलयुक्तिविमर्शरूपः तद्वान् तदभ्यासपरो भ
वेत् न तु सदा साधनकर्मनिष्ठ एव भवेदिति भावः एवं हेतुमाह नाज्ञानेति यस्मात्कर्मणोऽज्ञानहानं न भवेत् रागसंक्षयश्च न भवेत् कर्मणस्तदुभयैकाश्रयकृत्वात् ततः कर्म सदोषं दोषो रागद्वेषाद
यस्तत्सहितमुद्भवेत् उत्पन्नं भवतीत्यर्थः ततश्च रागादिसहितकर्मोत्पत्तेः पुनः संसृतिः संसारोपि न निवारिता न निवर्तत इत्यर्थः यत एवं तस्मादित्यादि तत्कार्यं एवं च न ज्ञानवत्कर्मणोऽज्ञाननिवर्तकम
मितिभावः १०। ननु क्रिया वेदमुखेन चोदिता यथैव विद्या पुरुषार्थसाधनम् कर्तव्यता प्राणभृतः प्रचोदिता विद्यासहायत्वमुपैति सा पुनः ११। नन्विति पूर्वपक्षद्योतकः पूर्वपक्षस्तु श्लोकत्र
यात्मकः केचिद्वदन्तीति च तत्र श्लोके तत्स्थहेतुगणं पर्यमिति शाब्देन परामर्शमात्रम् ननु यथैव वेदमुखेनाम्नायान्तरे इहप्रचयमाद्योपुरुषार्थसाधनं पुरुषार्थसाधनत्वेन विद्या प्रचोदिता विहिता
तथैव क्रियापि प्रचोदितेत्यन्वयः यथाहरहः सन्ध्यामुपासीत यावज्जीवमग्निहोत्रं जुहुयादित्यादिः ननु निष्कामकर्ममात्रस्य विविदिषासाधनत्वेपि नित्यत्वमत्राह यज्ञान्यर्थविविदिषन्तु
पुंसोऽनुष्ठीयमानं कर्माज्ञानरागादिदोषपोषणेन सांसारं निबध्नात्येवेति कथं तु नस्तत्केवलस्य साधनमित्यत आह कर्तव्यतेति याम्यतश्च तद्यथं सर्वप्राणभृतो देहिनः कर्तव्यता क्रियाप्रचोदि
ता विहिता सा पुनः सत्त्वशुद्ध्याद्यन्तरमपि विद्यायाः केवलं साध्ये सति विद्यासहायत्वमुपैतिकुर्यादेविर्विघ्नफलजननेऽपुराने तत्कर्म वत्वात् एवं च न विद्यायाः केवल्येऽपि जननसामर्थ्यम स॰
यहृतीत्यर्थः तथाच कर्मणः संन्यासादिसाम्यमुक्तं भगवता कृष्णेन अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च योगी च न निरग्निर्न चाक्रियः इति एवंच केवल्यपर्यन्तं क्रियानु
ष्ठेया संन्यासस्तु गार्हस्थ्यासमर्थान्धपङ्ग्वादिविषय इति सिद्धम् अत्रैव तत्त्वान्तराण्याह ११॥ कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं मुमुक्षुणा ननु स्वतन्त्रा ह्यखिलकार्यका
रिणी विद्या न किंचिन्मनसाप्यपेक्षते १२॥ कर्माकृतौ कर्मपरित्यागे प्रत्यवायदोषमपि श्रुतिर्जगौ प्रोक्तवान् तथाच वीरहा वा एष देवानां योऽग्निमुद्वासयत इत्यस्य तत्र ह्यसनस्तु तस्यागार्हस्थ्यपरित्या

गस्यदोषः श्रूयते तस्मात्कर्मणः परित्यागे दोषश्रवणात् कैवल्यसिद्धौ सहायत्वाच्च इदं कर्म कुशलत्वात् सदा कार्यं सदैव कर्तव्यमित्यर्थः । न तु केवलविद्ययैव कैवल्यसिद्धौ किं कर्मणेत्यत आह तत्तस्त-
द्वेति स्वतन्त्रं कर्मानपेक्षितं फलं कार्यकारिणी मोक्षप्रदायिनी न तु तथैव वर्ततीत्यर्थः । अपि हे तो धस्माच्चिन्मनसा चिन्तितमनोऽयस्य तेन विद्यावता मुमुक्षये कर्म किं न अपेक्ष्यते किन्त्वपेक्ष्यत एवेत्यर्थः । अ-
नक्षादिभिर्विद्यावद्भिरपनुक्षितत्वात् कश्चित्तस्य केऽपेक्षत इति निरपेक्षारः कर्तृलकारणावयव अत्र च विधौ पैवक्त्री विद्या मनसा मनःशोधकत्वेन मुमुक्षये किञ्चित्कर्मापेक्षते न अपेक्षत एवेत्यर्थः ।
द्वितीयनकारस्त्वागामिश्लोकादाक्षिप्यते अन्यत्तु प्रकृतमेव इदानीं फलोपकारकत्वेनान्यसहायत्वे प्रयाजादिदृष्टान्तमाह । नसमकार्यापि प्रियदृष्टधरः प्रकाशनेऽन्यानपिकारकादिकान् न
यैव विद्या विधितः प्रकाशितैर्विशिष्यते कर्मभिरेव मुमुक्षये, पहत यथाहि स्फुटम् अक्षरेयत्तः दर्शपौर्णमासादिः स्वर्गादिफलोत्पादनायान्यान्स्वरूपातिरिक्तान पिकारकादिकान् प्रयाजादीन्
काशनेस्वयोषत्वेन प्रकाशयतितथानुरागात्मभावितत्त्वार्थः । अपेक्षतेऽरतिभावः तथैव विद्या मुमुक्षये कैवल्यजननार्थं विधितः प्रकाशितैर्वेदविहितैः कर्मभिरेव शेषभूतैर्विशिष्यतेऽनुपतेनान्यैः । श्रव-
णादिभिस्त्वेवात्वद्धर्षीनां विद्यास्वरूपजननोपक्षीणत्वात् किंभूतो ध्वरः न समकार्यापि न सत्वकार्यं यस्य स नश्वरफललोपीत्यर्थः । यदि नश्वरफलेऽपियोगे फलोपकार्यङ्गापेक्षास्ति तर्हि किमु व-
क्तव्यं ध्रुवफलायां विद्यायां फलातिशयेप्सायां फलातिशयस्य प्रसिद्धत्वात् सर्वत्र नकारास्येपेत नन्वत्र कुकौद्धधप्ररोचनार्थं लघुकादेरियागादिकर्मप्ररोचनार्थं स्वर्गादेरपि फललाभावात्कथं फ-
लोपकार्यङ्गापेक्षायामहसान्तरस्य तन्माह सत्यकार्येपीति अवितथफलः वेदप्रमाणत्वात्कारीरीयागादौ प्रत्यक्षदृष्टं साध्यफलेऽपि तस्मात् निश्चितफल एवेत्यर्थः । अत्रायं भावः यागोऽहि द्विविधम-
ङ्गं जातं भवति सिद्धरूपं साध्यरूपं च तत्र सिद्धरूपं जातिद्रव्यसंख्यादि साध्यरूपं तु क्रियैव तच्चाहि द्विविधम् संनिपत्योपकारकमाराडुपकारकं च तत्रेङ्ग्यादिसंस्कारकत्वेन विधीयमानं यागस्वरूपान्तर्भूतं कर्म
संनिपत्योपकारकम् व्रीहीनवहन्तीति व्रीहीन् प्रोक्षतीत्येवंविहितावघातप्रोक्षणादि तद्विपरीतं च फलजननसामर्थ्यजनकत्वादिना यागोन्वितं कर्माराडुपकारकम् तत्र समिधो यजति तनूनपातं यजतीत्ये-
वं विहितं प्रयाजादिकं सामर्थ्यजनकतयाकारकं कथ्यते बृहस्पतिसवादिकं तु यागस्य फलजननसामर्थ्यस्थितानुपयुक्तत्वात् स्थापकमित्युच्यते वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपे-
योत्तरकालं तत्प्रयोगबहिर्भूततेन विहितो बृहस्पतिसवः सामर्थ्यस्थापकः एवं सामर्थ्यस्य वाजपेयेन स्वाराज्यकामो यजेतेत्यत्रापाकृतादिना प्रयोगान्तर्भूतारादुपकारके प्रागेव सिद्धत्वात् एवंविधाश्चा-
राडुपकारकाः पवमानेष्टिकेकारकादिकशब्देनोच्यन्ते तत्र यदाग्नेयोऽष्टाकपालो मावस्यायामित्यादिवाक्यविहितो वधातप्रोक्षणादिसंनिपत्योपकारकैरङ्गैः समर्थस्वरूपो विदर्शपौर्णमासाभ्यां स्वर्गकामो
यजेतेत्यभिहितफलो दर्शपौर्णमासप्रयोगोऽप्याराडुपकारकप्रयाजादिनैरपेक्ष्येण स्वर्गरूपफलं जनयति तथा श्रवणादिनास्वात्मिकापि ब्रह्मविद्व्रवभवती ताभिहितफला विद्या कर्मनैरपेक्ष्येण ब्र-
ह्मभावरूपं फलं न जनयतीति सिद्धम् इदानीमन्वित्यादिश्लोकत्रयोक्तं सर्वं पक्षं दूषयति ॥ केचिद्दक्षीनिति तर्कवादिनः सदत्र दुष्टहि विरोधकारणान् देहाभिमानादिभिर्वर्तते न क्रियाविद्याप्रहतितः
प्रसिध्यति १४ । केचिदितर्कवादिनः विपरीततर्कवादशीलाः वस्तुविचारस्मृत्याःप्रत्युपाः इति पूर्वश्लोकत्रयोक्तप्रकारेण यदि द्याया सज्जायेक कर्मसापेक्षत्वं वदन्ति तदत्र ब्रूमः विद्यायाः दुष्टदोषयु-
क्तत्वान्न घटत इत्यर्थः दुष्टत्वे हेतुमाह विरोधस्यातत्कारणान्देतोः ज्ञानकर्मणोर्विरोधो हि ज्ञानस्य कर्मसापेक्षत्वं दूषयति विरोधमाह देहाभिमानादिति देहोऽहं मम वेत्यभिमानात् क्रियाप्र-
वर्तते गताहङ्कारस्य निरभिमानस्य विद्याप्रसिध्यति प्रत्यर्थेनसि स्यादेव अत्र देहाभिमानसद्भावासद्भावाभ्यां विरोधः तत्राभिमानाभावप्रदर्शनाय विद्यास्वरूपमाह । १६ । विशुद्धविज्ञानविरोचनाञ्चिता विद्यात्मवृत्ति-
श्चरमेति भण्यते अहेति कर्माखिलकारकादिभिर्निहन्ति विद्याखिलकारकादिकम् । १५ । विशुद्धं कार्यकरणोपाधिविनिर्मुक्तं यद्विज्ञानं ब्रह्मतस्य विरोचनेन स्फुरणेनाञ्चिता प्रवर्तिता याचात्मवृत्तिः मनो-
वृत्तिःसाविद्या यथाहृष्टपसत्त्वनिश्चयवतः सर्वत्रहृष्टपविरोचनाञ्चितावृत्तिरुदेति तथाविदतिरिक्तदृष्टपात्मनाभावनिश्चयवतः विशुद्धविज्ञानविरोचनाञ्चितावृत्तिरुदेति तथाचिदतिरिक्तदृष्टपात्मनाभाव-
निश्चयवतः विशुद्धविज्ञानविरोचनाञ्चितावृत्तिरुदेति सैव विद्या यथाम्बुजादौ स्मात्र तत्प्रत्ययस्त्याशरीरादिदृष्टपभासमानेऽपि चिन्मात्रतत्प्रत्ययो विहितोनिभावः तथाचविहदनुभवः । सर्गादावेव को

नदुक्तं

त्यक्तं दृश्यमेतन्न किंचन निर्विकारश्चिदानन्दघनोऽहं सर्वतः स्थितेः नहि तत्सांदेहाभिमानिनः संभवति नन्वस्य ज्ञानायामपि विद्यायां प्रत्यवायनिवृत्त्यादिद्वारा मोक्षार्थं नित्यकर्मीकाङ्क्षास्त्येव ह्यपि कर्षणिकार्षण
समीकरणवपनादेरिवोपायस्यायायान्तराद्दृष्टकत्वादित्यतआह चरमेति सा विद्या विद्वद्भिश्चरमा सर्वसानभूता इत्येवं भण्यते कथ्यते सर्वविधीनां साक्षात्परंपरया वा विद्याजननमात्रे पर्यवसानात् हवि
षि तत्कर्मणिफलत्वचिन्तिवज्ज्ञानायां न स्यान्न किंचित्कर्तव्यमवशिष्यत इति भावः येऽत्वेतां विद्यामिति काचेत्तो हन्ति सुपेत्य केवलं युक्त्वनुसन्धानकोद्याले नैव सन्तन्मान्निलेत्वेयापि क्रादि सहश्रोतादिं तापव
तदुक्तम् वेदान्तावद्भूततर्ककर्कशमतिग्रस्ताः परं मायया भ्राह्ताः कर्मकलाकुला हतधियो द्वैतेतिवैशेषिकाः अन्ये भेदरताविवादकलहास्तेनैव तो वृद्धितास्तस्मात्सिद्धमतं स्वभावकेमयं धीरः परं संश्रयेदिति
कुशलात्वक्षमवाणीयो हन्ति दीनाः स्वरागिणः तेषां ज्ञाननमान् तेषु नरा यान्ति याम्निर्त्ये कर्म अखिलकारकादिनिरुद्धेति तद्ज्ञात्मकं भवति कारकाणि कर्त्रादीनि आदिना इति कर्तव्यतादिग्रहः अखिलशब्दस्त्वेतेषाम्
न्यतमाभावे कर्मवैकल्यध्वननार्थः विद्या अध्यस्तनिराकरणशीला अखिलतत्कारकादिकं निहन्ति नाशयति न स्वचिदात्मन्यध्यस्तत्वात् तत्स्वरूपस्योपमर्दीत्वं कर्मविद्ययोः सहायत्वे नान्वेति तिमिद
म् ॥ १५ ॥ तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्न समुच्चयो भवेत् आत्मानुसन्धानपरायणः सदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६ । यस्माद्विद्याविरोधात्कर्मणः समुच्चयो विद्यया सह तत्कारितेन
संभवति तस्मात्सुधीर्विचारवान्विद्याधिकारी अशेषतः कार्यं त्यजेत् सर्वकर्मसंन्यसेदित्यर्थः अस्य विविदिषासंन्यासिनः कृत्यमाह आत्मेति निवृत्तसर्वेन्द्रियवृत्तिगोचरः सन् तत्त्वज्ञः सर्वेन्द्रियाणां वृ
त्तयो विषया यस्येत्येवंविधः सन् सदा आत्मानुसन्धानपरायणः आत्मचिन्तापरः स्यादित्यर्थः तथा च आत्मा वारे द्रष्टव्य इत्यत्र श्रवणादीनां दृष्टार्थत्वान्नापूर्वविधिः किं तु नियमः पक्षिसख्यासा
चउभयप्राप्ताविन्तरनिवृत्तिं बोधयति यथा पञ्च पञ्चनखा भक्ष्या इत्यत्र शशादिमांसेतरपञ्चनखेभ्यो भक्षणे तन्निवृत्तिबोधः तदुक्तम् नियमः पक्षिसख्याता विध्यर्थादिह वेद्यते अनात्मादर्शनेनैव
परात्मानमुपास्महे इति स्मृतिश्च आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया इति तं पदार्थविवेकाय संन्यासः सर्वकर्मणाम् श्रुत्याभिधीयते यस्मात्तत्त्यागी पतितो भवेदिति संन्यासिनो याः पृज्ञा वा निहा
त्र प्रयोगवन्निरोधेन विहितस्य श्रवणादेः परित्यागो विप्रमादः गृहस्थादीनां तु श्रवणादिकाम्यं दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात् गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं लभेदिति त
थाच संन्यासस्याग्रतः यदहरेव विरजेत्तदहरेव प्रव्रजेदित्यादिश्रुतिभ्यः सिद्धत्वाद्वैराग्यसिद्धं रोगोऽस्मिन्निति गृहस्थस्य विषयप्रवृत्तत्वे केन चिन्मति वध्ये न संन्यासः प्राप्त इति संभवेत् तस्मान्न संन्यासः प्रयुक्त एव तथा च जनकादी
नां जीवन्मुक्तानां न्यासस्य संन्यासस्वीकार इति कल्पनं शोभत । १६ । ननु तेषामात्मविवेकज्ञानजनकादीनां तु विद्यामपि विधिकिंकरत्वमेव कर्मसु प्रवृत्तिश्रवणादिस्तत्राह यावच्छरीरादिषु माययात्म
धीस्तावद्विधेयो विधिवादकर्मणाम् नेतीति वाक्यैरखिलं निषिध्य तज्ज्ञात्वा परात्मानमथ त्यजेत्क्रियाः १७ । शरीरादिषु शरीरं स्थूलं सूक्ष्मं कारणभेदेन त्रिविधं तत्सहितं आ
दिना पुत्रादिसंग्रहः तेषु यावन्माययात्मधीः शरीरादिरहमेवास्मीति बुद्धिरस्ति तावत्स नाधिविधिवादकर्मणां विधेयो भवति तत्र लिङादिवाच्यो भावनाविधिरिति मीमांसकाः विनियोगविधि
रिति प्राभाकराः इष्टसाधनता विधिरिति सर्वे तार्किकाः अत्र विधिशब्देन निषेधोऽपि गृह्यते तथा चात्र प्रयोजनमुद्दिश्य प्रवृत्तेः को निवर्तको वा विधिरिति सिद्धम् तत्र निवर्तकनिषेधस्य तु अनर्थहेतु
कर्मणः सकाशान्निवर्तनेन तदनर्थासंस्पर्श एव प्रयोजनं बोध्यम् तेन च येषां वा पदार्थेषु तत्साभावस्तत्र कामरतिर्बहिर्गीतं तन्मन्दस्याहिति च वादस्तु तत्र क्रमेण स्तुतिनिन्दाबोधको हि प्रमादनार्थः य
था वायुर्वै क्षेपिष्ठा देवतेत्यत्र तृप्तिफलप्रदत्वेन स्तुतिः सोऽरोदीदिति यदश्रोकुजनकत्वेन निन्दा च बोध्यते स चार्थवादः यस्य पर्णमयी जुहूर्भवति स पापश्लोकं न शृणोतीति तद्भूतदेवताद्युक्तेः दारेवाव
धेयप्राशस्त्यं बोधयति अंगस्तुफलकृच्छ्रार्थवादस्तिना यात् विधेयं कर्म तद्वा द्रष्टिविन्ते विधिर्बोधितया गादिष्वपि सिद्धमेव तेषां विधादीनामवश्यानुवृत्तत्वात्तर्थः यावत्कल्याणादीनां तल्लोके
संग्रहार्थं कर्म कुर्वन्नास्ति विधिकिंकरत्वम् शरीरादिष्वात्मबुद्ध्यभावात् शरीरादिसम्बन्धेन प्रवर्तमानस्य विधेर्वैदनेय्याशङ्क्य स्य पश्चात्तत्प्रतीतशरीराद्यध्यासाभावनिश्चयस्तेन किं नि
क्षिपंतस्मात्मानंज्ञात्वा तत्प्रत्यग्भूतमित्यर्थः तदेवाह नेतीति अथात आदेशो नेति नेतीति नेति तस्मादिति नान्यत्परमस्ति इति श्रुतिभिः तत्र शरीरादिकमखिलं निषिध्य रज्जुभुजंगादिवद्बाधयित्वा
यावत्तत्परमात्मानं ज्ञात्वा स्वस्वरूपमात्मतत्त्वान्तरं भयक्रियाः त्यजेत् सम्यग्भवतीत्यर्थः सर्वत्र समाप्यत इत्युक्तमिति स्मृतेर्विविदिषोः श्रवणादौ विक्षेपकत्वात्कर्मणा संन्यासविधिः इहतु तत्र कोपि

वा॰ गी॰
टी॰

विधिः प्रकृतत्वेन स्वात न्त्र्यास्य विवक्षितत्वात् यदा शुद्धचेतसः श्रवणादातिशयेन श्रवणादिभिरेव जातस्य ज्ञानस्य कारस्य गृहस्थादेर्विधिः किंकरत्वाभावे पि योगाभ्यासादिना जीवन्मुक्तिलाभाय विद्वत्सं
न्यासोयं विधीयत इति अत्र पक्षे श्रवणादेर्नैव विदुषः संन्यासविधिमपि निषिध्य परितो वादाह नेतीति अथ पशह्योत्र पक्षद्योतकः पक्षान्तरे तु बोधात्मैव ज्ञानमात्रेण चित्तविश्रान्त्यभावे सति जीवन्मुक्त्यर्थं
रूपः तथा च नेतीत्यादिना परात्मानमित्यन्तेनाभिहितो विद्वान् अथ यदि जीवन्मुक्त्यर्थं यदा पुनः तदा क्रियोत्सृज्य संन्यसेदित्यर्थः तत्रापि विद्वत्संन्यासो विधीयत इति सिद्धम् तत्र च एवं वेदसाक्षात्
न विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति एतमेव विदित्वा मुनिर्भवतीत्येतत् यदा तु विदितं तत्त्वं परब्रह्म सनातनम् तदेकदण्डं संगृ
ह्य सोपवीतां शिखां त्यजेदित्यादि स्मृतिवचनान्यपि प्रमाणानि १७ । यदा परमात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभाति भास्वरम् तदैव माया प्रविलीयते ञ्जसा सकारका कारणमात्मसंसृतेः
१८ ॥ यदात्मनि चित्ते विज्ञानं विद्याप्रवभाति प्रकाशते तदैवाञ्जसा नितरां यासेनैवमायाज्ञानं प्रविलीयते नश्यति नाशोऽस्य निरुज्जनकस्य चित्तनश्यति तस्यात्म निरुजनकत्वमाह आत्मसंसृते आ
त्मनः संसारस्य कारणम् ननु विद्यामात्मनि वृत्तावपि शरीराद्यनेककारकसत्त्वे कथं संसारनिवृत्तिरित्यत आह सकारकं प्रलीयते ननु एकमेव विज्ञानं कथमनेकनाशकत्वमित्यत आह परात्मेति
ब्रह्मजीवयोर्भेदः सर्वज्ञत्वाल्पज्ञत्वादिरूपो निखिलभेद इत्यतः तस्य भेदकं विनाशकमित्यर्थः नन्वनन्तकोटिजन्माभ्यासदृढतरमज्ञानं तत्कार्यं कथं ज्ञानोदयसमकालमञ्जसा नश्यतीत्यत आह
भास्वरम् प्रज्वलितप्रदीपे कन्दरादिषु वर्षकोटिसमवस्थितमप्यन्धतमसं मनागपि सन्न तत्क्षण एव यथा नश्यति तथा नश्यतीति भावः १८ । श्रुतिप्रमाणैरपि नाशितोऽयं सा कथं भविष्यत्यपि का
र्यकारिणी विज्ञानमात्रादमलाद्वितीयात्तस्मादविद्या न पुनर्भविष्यति १९ । श्रुतिप्रमाणैरपि अपि शब्दान्गुरुपदिष्टानां स्वयमहितानां च श्रुत्युक्तानां युक्तानां च सद्युक्तीनां संग्रहः नाशिता प्रमेयग
तानां ननिरुद्धत्वेन कृतार्थत्वादिप्रयोजनत्वात् तथापि पूर्वं नाशितापीत्यर्थः द्वितीयोपि शब्दस्तु साक्षाद्वेदानान्वेति तथा च सापि पूर्वं बोधज्ञानोदयमात्रेण सद्योविलयशीला सिद्धिनिपुणत्वभवेन्नाशिता पि मा
या पुनः कथं कार्यकारिणी भविष्यति किं तु निःशेषितस्य स्तु निहतं तदुर्बलत्वं तेन न भविष्यति न हि स्वकार्यजननासंभवप्रसिद्धेरिति भावः यद्यप्यस्य प्रलम्भमानकार्याया माया यो वि ज्ञानेन कथं प्रविलय
स्याशङ्क्याह कार्यकारित्वमपि साऽश्रुतिप्रभृतिप्रमाणैर्नाशिता सती कथं भविष्यति स्यात् किं तु सर्पादिकार्यकारिरज्ज्वज्ञानवद्विनश्यत्येवेति भावः ननु शरीरादिवस्तुनः स्याभविष्यतीत्यत आह न
त्वादिति ब्रह्मणः शुद्धं तस्मादिति निर्दिष्टो ब्रह्मणास्तु विधूतस्वतर इतिस्थितेः अविद्या तु न भविष्यति शरीरादेस्तु मायाकार्यत्वात्तद्वेषम्य नतु स्ववर्णाप्रकटकादिवद्रूप्यमपि पुनर्भविष्यतीत्यत आह वि
ज्ञानेति नहि प्रकाशादन्धकारोत्पत्तिः सम्भवति ननु सोपाधिकाज्ज्ञविष्यतीत्यत आह अमलेति प्रत्यक्तत्त्वं जगदुत्पत्तौ ब्रह्मणो मायोपाधिः कल्पितो मायोत्पत्तौ पुनः कः स्यात् प्रत्यक्तत्त्वकल्पकं तेरपे
क्षणोपाधिकल्पनाप्रसक्तौ त्वनवस्थानुपाधिहरेतु ननु यथासति स्वर्णस्याद्वादविस्तरकात्मादस्तित्वद्यते तथा ब्रह्मणोन्यसन्निधिमात्रेणाभविष्यतीत्यत आह अद्वितीयादिति अतएव मायायाञ्चानादि
त्वम् तथा च श्रुतिः अजामेकामित्यादिः अत्रापि वक्ष्यति अनाद्यनिर्वाच्यामिति १९ यदास्वरूपेण पुनः प्रसूयते कर्ताहमस्येति मतिः कथं भवेत् तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्याविमोक्षाय न कर्मशा
धनम् २० । यदा स्वज्ञानतो न हि माया पुनर्नैव प्रसूयते पुनः कार्यजननी न भवति तदा रज्जुसर्पादिवद्बाधितेषु शरीरादावहंकारादेरसंभवादहमस्य कर्मणः कर्तेति बुद्धिः कथं भवेन्नैव भवतीत्यर्थः तस्मात्स
र्वमर्थसल्लभता तेनान्धकारनिवर्तकस्य प्रकाशस्यात ज्ञानितानपेक्षा कलापात्तर्कं तेन कर्मणा सहभावासम्भवात् विद्या स्वतन्त्रा कर्मनिरपेक्षैव साधनं भवतीत्यर्थः ननु विद्यायाः स्वस्वनोकर्म
सापेक्षत्वस्य प्रसिद्धत्वात्कथं स्वातन्त्र्यमित्यत आह सा नेतरीयश्रुतिराह सा दर्शनाद्यसम्प्रशस्ताखिलकर्मणां स्फुटम् एतावदित्याह च वाजिनां श्रुतिर्ज्ञानविमोक्षाय न कर्म साधनम् । २१ सा लोकप्रसि
द्धानकर्मणां न पूजयाधनेन त्यागेनैके अमृतत्वमानशुरितिवं वाजिनीय श्रुतिः प्रशस्ताखिलकर्मणांत्यासंत्यागमाह प्रोक्तवतीप्रशस्तत्यागप्रोक्तं कामनिषिद्धपरित्यागस्तु केषुचित्कल्पे पु
सिद्धः न्यासशब्देन संन्यासाश्रमग्रहणात् स्यादित्यत आह सादरमिति नित्यकर्मस्त्रीशूद्राधिकारं च नतिरस्कृत्येत्यर्थः संन्यासाश्रमेतु तदनादरः प्रसिद्ध एवागमस्तु नित्यकर्मसक्रियमाणेषु
पि मनसा ननं कल्पपरित्यागस्यानविरहाद्यते न तत्कामानिषिद्धयोस्तु चित्तकालेष्वेतत्त्वाज्ञत्वत्याग इति मानः अत्र मागिन्त्वपूरणाच्चाकोः अवर्णादिप्रहणे नास्त्रीशूद्राणामप्यधिकारो
विवेकात्वेदेति सोयंतो निष्काम कर्मश्रवणादिसापेक्षत्वेपि विमोक्षायैकेवलं शक्नोतीति किमपि किञ्चिद्दर्शनायेते अतोऽस्यां मुक्तोऽस्त्यन्यच्छेक कर्मसाधनं न भवतीत्यर्थः २ ननु ज्ञानोदये सति कर्मणो रहसाधनत्वाभावेऽपि विविदिषोर्ज्ञानाभावाज्ज्ञानसाधनत्वाच्च
कर्मणो वा एव सिद्धमस्त्वागत्

7

न निवार्यते अयं च त्यागो वैराग्यशेषोपि स्यादिना प्रतिबद्धसंन्यासाश्रमस्य विविदिषोः श्रवणादौ विक्षेपनिवृत्तये भवति संकल्पविक्षेपकत्वादेतस्य च तत्त्यागरूपत्वात् तथा च श्रीकृष्णगीतायाम् ब्रह्म
ण्याधाय कर्माणि संगं त्यक्त्वा करोति यः इति योगिनः कर्म कुर्वन्ति संगं त्यक्त्वात्मशुद्धये इति अनाश्रितः कर्मफलं कार्यं कर्म करोति यः स संन्यासी च योगी च न निरग्निर्न चाक्रियः इति च तत्र यः कार्यं नित्यं
कर्म करोति कर्मफलमनाश्रितो भवति कर्म च फलं चेति समाहारद्वन्द्वः तदुभयं नाश्रयति सम्यग्ज्ञानहेत्वर्थं नित्यं कर्म तत्फलं वा ममोपकरिष्यतीति न संकल्पयतीत्यर्थः निषेधे च न हि यावज्जी।
वं संगास्प्रयोगः केनाप्यत्र हातुं शक्यत इति काम्यकर्मवदङ्गवैकल्याभावाभावाद्यथासम्भवमनुष्ठीयमानमपि नित्यं कर्म संन्यासिनः श्रोत्रनिद्रादिविजिगीषोः श्रवणादौ न विक्षेपकं भवति प्रत्युत तत्सत्त्वशोध
कमेव भवति तत्र त्यागाश्रमभेदाद्द्विविधः संन्यासी इति धर्मस्यैव एतावदिति एतावदरे खल्वमृतत्वमिति एवं प्रकाराविजिज्ञासितं बृहदारण्यके विमोक्षाय मुक्त्यर्थं ज्ञानसाधनमाह श्रोक
वानीनकर्म श्रवणेरर्थस्य परमैवेत्यपि तत्त्वज्ञानेच्छाविज्ञासितममृतत्वसाधनम् एतावदरे खल्वमृतत्वमिति उपदिष्टं तस्याचरणं तेन नामादिति चकारो बुद्धिसात्त्विकम् अर्थः वामदेवादिहस्तार्थः तेषु श्रा एत।
मेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति श्रुत्यन्तरवाक्यस्य तारतम्यमहानन्दात्मा मेति प्रव्रज्यादान्तर्य तद्वृत्ति नपरासहत्वात्स्वात्मनि तत्स्वरूपं तेषां स्वशीलिनद्धार्थ मिति दृश्यते प्रत्यक्षमानमविप्रयमानतये
तः प्रव्रजन्तीति श्रुतेरर्थः स एव तावदयं विविदिषासंन्यासः विद्वत्संन्यासोपि न चैवं मैत्रेयीं संदेहो वाचं याज्ञवल्क्यः प्रव्रजिष्यन्नाहमस्मात्स्थानादस्मीति प्राकृतानि मैत्रेयी जीवनानन्तरं न्याय.
मृष्य तावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहारेति विहरणं मैत्रेय्या याज्ञवल्क्येनानु संन्यासस्यानुष्ठितत्वादभिधानादस्यादभिहितं पव्य अत्र तत्संन्यासं सह यम् प्राज्ञमनस्य मेव प्रव्रजेत् जे कोके व
रहत्वात् तथा बहुनानुकूलतया कर्मसंन्यासविधानात् तथान्तरनिष्ठा च न ज्ञानकर्मणोर्विरोधाच्च मोक्षस्य ज्ञानमेव साधनं न कर्मेति सिद्धम् २१। इत्थं श्रुतियुक्तिभिः सिद्धान्तदृढीकरणेनतिरोह
न मध्ये कादश्यादिश्लोकत्रयेणोक्तं सर्वमनुवृक्तियेत्यादिः सर्वपदं तमिदानीमनुद्रवयति। विद्यासमत्वेन तद्दर्शितं तस्य यातु नहि तस्या तेषु दाहृतः सम्यः फलैः पृथक्कोद्धृत्वा पूर्वके मोक्षः स साध
नज्ञानमनोविपर्ययः २२। तथानवृक्तियेत्यादिना वाक्येन कर्तृः कर्मविद्यासमुत्वेनया तत्त्वतयादशिनः कथितं उदाहृतं तत्र हत्वात्रो दर्शपौर्णमासादियागो यथाप्रयाजादिकं विनास्वर्गादिफ
लेन जनयति तथा ज्ञानमपि कर्म विना केवल्यं न जनयतीत्येवं रूपो न सम्मः तत्त्वोनास्तीत्यस्य हेतुमाने वेधस्याप्यदार्यानिकसिद्धिरिति भावः कथं वेधस्याभिमतं नत्वाह फलैः पृथक्कादिति कर्म।
णः फलं स्वर्गादिः विद्यायास्तु केवल्यमिति फलभेदात् प्रयाजादेर्हि फलाभावात् आकाङ्क्षायां प्रयाजादिभिरुपकृतस्य यागेन फलभावयेदिति यागफलमेव भावस्तेन प्रकल्प्य यागफलेन क
रकत्वेन यागेन त्वयः संभवति रहते स्वर्गादिफलशालिनो कर्मणो भावाकाङ्क्षायां प्रत्याभावात् कथं विद्यायां तत्फलकैवल्योपकारकत्वेनान्वयः संभवेत् न च जीवनादिनिमित्तेन विधीयमाना
नां नित्यकर्मणां फलाभावात्साकाङ्क्षयाकाङ्क्षायां विद्याफलोपकारित्वेन विद्यायामन्वयः स्यादिति वाच्यम् वर्णाश्रमस्य स्वधर्मनिष्ठाः इत्यस्मोकामवत्री स्यादिस्मृतेः नित्यकर्मफलस्यापि श्रुतत्वान्न
न. ननु वेदस्यागमा पाधिरज्जुभुजङ्गायमानजगद्भ्रमपोषकत्वे रोचयामः किं तत्फलासामर्थ्यादत्व कर्मश्रुतेर्वाध्यत्वे न प्रकल्प्य वेदोक्तकर्मणाम् अपि भावाकाङ्क्षायां केवल्योपकारकत्वेन वि
द्यासहायत्वमेव ज्ञापयतीति चेन्न प्रधानकर्मसंबन्धिनां फलासामर्थ्याद तत्प्रकल्पनेमानाभावात् फलनैरपेक्ष्येण कृतानां तेषां सत्त्वशुद्ध्यादिना ज्ञानोपकारकत्वेपि केवल्योपकारकत्वासम्भ।
वाच्च प्रसिद्धेहि कर्मणां कर्तृकर्मादिभेदबुद्धिनिबन्धनत्वेन केवल्यानुपकारकत्वम् आत्मज्ञानस्य तु केवलस्य निःश्रेयसहेतुत्व [redacted] मस्ति भेदप्रत्ययनिवर्तकत्वेन केवल्यफलावसानत्वात् अकार्य।
त्वाच्च निःश्रेयसस्य न कर्मणां तत्साधनत्वम् न हि नित्यं वस्तु कर्मणा ज्ञानेन वा जन्यते नचैवं ज्ञानस्याप्यानर्थक्यम् स्वात्मन्यारोपितानेकजागतपदार्थभेदापादकाविद्यातमोनिवर्तकत्वेन ज्ञानस्य केवल्यफला
वसानत्वात् रज्जुहि प्रदीपप्रकाशफलस्य रज्जुज्ञानस्य विनिवृत्तसर्पादिभेदभ्रमरज्जुकेवल्यफलावसानत्वम् तथा च दृष्टार्थवाद्याभिदिक्रियादीनां तद्वादृष्टकारकाणां च देहभावादिफलादन्यफ
ले कर्मान्तरे वा व्याप्तिर्नोपपद्यते तथा ह दृष्टार्थाधानानि दृष्टक्रियाद्याप्तनस्य ज्ञानादिकारकस्यात्मके वल्यफलादन्यफले कर्मान्तरे वाप्यनुवृत्तिर्नोपपद्यते तत्र च ज्ञाननिष्ठस्य कर्मसाहित्यम् न च ज्ञान
तत्त्विः फलं निर्वाणं त्विहोत्रादिक्रियावस्थादिति वाच्यम् केवल्यफले हि ज्ञानेन आसर्वतः संप्लुतोदकेफले मोक्षरूपे तडागादिक्रियाफलाप्रिविन्त्याभाववत्फलान्तरे तत्साधनक्रियायां वाप्यचिन्त्यानुपपत्तेः नहि।
स्वर्गः फलं राजप्राप्तिफले कर्मणि व्याप्तस्य तत्प्राप्तिफले व्यापारसाद्भिष्यतावार्थित्वमुपपद्यते तस्मान्नकर्मणां निःश्रेयससाधनत्वे नापि ज्ञानेकर्मणोः समुच्चय इति सिद्धम् नन्वेवं द्वारा केवल्योप

ए.नी.
टी.
८

8

कर्त्रकस्य कर्मणो यागादेः सुभमुहूर्त्तस्यैव तानेसाहाय्यमपेक्ष्यत इत्याह अहङ्कारकेति कर्त्तृबुद्ध्यङ्कारकैः संसाध्यते ज्ञानमतः कर्मणः सकाशाद्विपर्ययः विपरीतं सर्वकारकविलापकत्वात् अतो विरोधा
च्च ज्ञानस्य कर्मसाहाय्यापेक्षेति भावः नहि तमस्तमसो निवर्त्तकमतः केवलमेव ज्ञानमज्ञाननिवर्त्तकत्वान्निःश्रेयससाधनमिति सिद्धम् सुहूर्त्तस्यतमा ऊनव कुभाग्य नस्त्वचकत्वेनाहतस्य फलोपकारा
सम्भवस्य प्रसिद्धत्वाद् दृष्टान्तश्चैव मांस्फुटमेव २२ ननु न केवलाज्ज्ञानात् कैवल्यप्राप्तिः नित्यकर्मणामकरणे नरकादिप्राप्तिलक्षणस्य प्रत्यवायस्य दुर्वारत्वात् न चैवं कर्मभ्यो मोक्षो नास्तीयति कर्मोत्त
पत्त्वस्यादिति वाच्यम् नित्यानां कर्मणामनुष्ठानात् प्रत्यवायाप्राप्तिः प्रतिषिद्धस्य चाकरणाद् निकृष्टशरीरानुपपत्तिः काम्यानां च वर्जनाद् दिव्यशरीरानुपपत्तिर्वर्त्तमानशरीरारम्भकस्य च कर्मणः फलो
पभोगेन क्षये सति पतितेऽस्मिन् शरीरे देहान्तरोत्पत्तौ कारणाभावादात्मनो रागादीनां चाकरणात् स्वरूपावस्थानमेव कैवल्यमिति यत्नसिद्धत्वात् कैवल्यस्य अनेकान्तानेकजन्मनस्तस्य स्वर्गनरकादि
प्राप्तिफलस्य सञ्चितकर्मणस्त्वाभ्यामनस्यैव कर्मता नित्यकर्मणां चाप्रायश्चित्तवत् सर्वोपात्तदुरितक्षयार्थं ताहृशभोगानुपपत्तिरित्यत आह सप्रत्यवायो प्यहमित्यनात्मधीर्यस्य प्रसिद्धेन वतत्त्वदर्शिनः त
स्माद्बुधैस्त्याज्यमविक्रियात्मभिर्विधानतः कर्मविधिप्रकाशितम् २३ ॥ कर्माकृतौ दोषमपि स्फुटि तिजङ्गा वितिष्ठेत् तयोर्योनिमाकरणप्रत्यवायः सत्यस्य पुरुषस्य सिद्धान्तज्ञानेन दग्धपटसा
म्येनापादितात्र अहमित्याद्याकारा अनात्मधीः शरीरादिभावनावर्त्तते नस्यैव भवति न तु तत्त्वदर्शिनः तस्य तत्त्वदर्शिनेन ज्ञावनायादग्धत्वादिति भावः अपि शब्दोत्तमोसमुच्चयार्थः तेन सर्वकर्मस
मर्पणावार्यते तथाच श्रुतिः हृदयमेव ज्ञानसहस्रं प्रपश्यन्ति रुत्रात्म्यानस्तास्ति परमार्थविन्नपुर्णैर्नचपापैर्लिप्यते विमलं तीर्थं कृतोऽपि यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लोका
न्न हन्ति न निबध्यते इति यत्तस्य वैक्रिया कर्मानुष्ठानेनापत्नसिद्धमेव कैवल्यमित्याद्युक्तं तन्नमेवाविदितानि मल्लुमेति नाम्यः पन्था विद्यतेऽयनायेत्यादिश्रुतिषु ज्ञानेनैव साधनप्रतिषेधात् संचितकर्मणा
न्नयानुपपत्तेर्नित्यकर्मणां पुण्यलोकप्रापकत्वोक्तेश्च नित्यकर्मणां संचितदुरितक्षयार्थत्वेऽपि संचितपुण्यस्य तथानुपपत्तेर्धर्माधर्महेतूनां रागद्वेषमोहानाम प्यमयत्नाद्यज्ञानाद्युच्छेदानुपपत्त्या धर्माधर्म
हेतुरानुपपत्तेश्च दुर्वारएव संसारः कर्मिणस्त्वसिद्धम् तथाच भागवते कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते अविद्वदधिकारित्वात् प्रायश्चित्तं विमर्शनमिति विमर्शनं ज्ञानमेव नैष्कर्म्यसाधनमुक्तम् कारर॰
तस्मात्कर्मणां विधावनुवर्त्तनके वल्यहेतुत्वाभावाद्बुधैर्विचारवद्भिर्ज्ञानाभ्यासविरुद्धत्वात्कर्मविधानेना नुष्ठानस्य ज्ञानानुष्ठेयमित्यर्थः यद्वा विधानतः विधिवत्त्वाधिकारानुसारेण त्याज्यमागमसम
स्यमं वास्तोचितं कुर्यादित्यर्थः विधिप्रकाशितं कथं त्यज्यतमित्यत आह अविक्रियात्मभिरिति रागादिविहितानः कारणैः कर्मविधेरागिणः प्रत्येवप्रवृत्त्ववान् विरक्तः स्यात्तु यदहरेव विरजेत्तदहरेव प्र
व्रजेदिति संन्यासविधानात् २३ कर्मत्यक्त्वा किं कुर्यादित्यत आह ॥ श्रद्धान्वितस्तत्त्वमसीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः विज्ञाय चैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रक
म्पनः २४ । श्रद्धान्वितः श्रुद्धमानसो विद्वज्ज्ञार्थोऽपि विपहृत्त्व भयोरवधापकत्वद्योतनार्थः तथाचापुण्यानाधिकारी कर्मत्यक्त्वा तत्त्वमसीतिवाक्यतो गुरोः प्रसादात्स्वहृदयादभयाद्विधसामग्रीसपाद
का आत्मजीवयोर्ब्रह्मात्मनोरैकात्म्यमभेदं विज्ञाय प्रत्यक्षात्मसाक्षात्कृत्वा मेरुरिव यथा मेरुर्वायुना न प्रकम्प्यते तथायमपि रागादिभिरप्रकम्प्यो लोभः सन्सुखी भवेज्जीवन्मुक्तो भवेदित्यर्थः
त्य॰ अप्रकम्पनो मङ्गले । २४ । प्राङ्गोपदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः तत्त्वंपदार्थो परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत् २५ । विधानतः विधिवद्वाक्यार्थवि
ज्ञानजननेऽत्र आद्यौ प्रथमं हि प्रसिद्धं कारणं पदार्थावगतिः पदानामर्थज्ञानं भवति पदार्थज्ञानाधीनत्वाद्वाक्यार्थज्ञानस्य पश्चात्समर्गादिः कारणम् अतस्तत्त्वमसीति पदानामर्थाः पृथक्कथ्यन्ते
तत्त्वंपदार्थाविति विस्तरेण तु परमात्मजीवयोस्तदेकस्य च स्वत्वपसमस्तवाक्यार्थकथनान्तरं वक्ष्यते अयं तत्त्वंपदार्थसामानाधिकरण्यपर्यालोचनानन्तरं महावाक्ये दयदनयोस्तत्त्वंपदार्थ
योरैकात्म्यमेकत्वं तदसीतिपदस्यार्थो भवेदिति योजना २५ ननु तत्त्वमसीत्यत्र नीलमुत्पलमित्यादिवद्विशिष्टैकत्वबोधो युज्यते नापि विशेषणविशेष्यभावो भेदः संभवति परस्परविरुद्धधर्मत्वात्
प्रत्यक्त्वादिधर्मी प्रत्यक्त्वादिवाक्यं वाक्यार्थप्रकारमाह ॥ प्रत्यक्परोक्षतादिविरोधमात्मनोर्विहाय सङ्गृह्य तयोश्चिदात्मताम् संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भ ८
वेत् २६ ॥ आत्मनोर्जीवात्मपरमात्मनोः प्रत्यक्त्वपरोक्षत्वादिविरोधं विहाय तयोरात्मनोश्चिदात्मतां चिदेकरूपतां सङ्गृह्य विज्ञाय तदर्थं वदन्ति चेतन्यरूपं स्वमात्मानं ज्ञात्वा स्वात्मा
त्मत्वमद्वयो भवेत् अत्रादिना स्वतन्त्रत्वसर्वज्ञत्वादिसंग्रहः प्रत्यक्परोक्षेति भावप्रधानो निर्देशः नञ्ञानयोः प्रत्यक्त्वपरोक्षत्वादि विरोधं विहाय पञ्चकोशकल्पनारहिते चिदेकरूपत्वसिद्धान्तिनया

त्यपीत्यत आह संबोधितामिति मायिकप्रपञ्चकारणत्वाद्युपाधिमलस्थनेति नेतीति निषेधनेन विदात्मतापत्त्या वशोषितत्वात् ननु कथं तत्त्वंपदयोर्वाच्यांशपरित्यागइत्यत आह लक्षणयेति वस्तुमात्रलक्षणयास्व
रूपलक्षणया चकारो वाक्यजन्याखण्डार्थबोधप्रबोधनलक्षणो योऽभ्युपायोरप्यावयपकत्वयोत्तनार्थः २६ इदानीं तत्त्वमसीति वाक्ये लक्षणान्तरनिषेधपूर्वकं जहदजहल्लक्षणायाः प्रयोगमाह । एका
त्मकवाजहत्तान सम्भवेत्यजहल्लक्षणया विरोधतः सोऽयपदार्थवदेवास्मिल्लक्षणा प्रयुज्यते तत्त्वंपदयोरहो यतः २७ । मानान्तरविरोधे हि मुख्यार्थस्यपरिग्रहे मुख्योऽर्थेनाविनाभूते प्रवृत्तिर्लक्षणोच्य
ते इत्युक्तत्वान्मुख्यार्थसंबन्धिबोधकः शब्दव्यापारो लक्षणेति सिद्धम् सच लक्षणात्रिधः शब्दव्यापारस्त्रिविधः जहदजहज्जहदजहच्चेति तत्र निःशेषतः शक्यार्थं विहाय तत्संबन्धिबोधनं जहल्लक्ष
णाव्यापारः यथा गङ्गायां घोष इत्यत्र नासम्भवात्स्वार्थमित्यजहत्। तत्र गङ्गाशब्दो तीरस्य बोधकस्तथा तत्त्वमसीत्यत्र जहल्लाक्षणिकव्यापारेण कस्यापि दृष्टस्य बोधस्यासंभवेत् सर्वः संभवतीत्यर्थः प्रवृत्तिशब्दव्या
पारेणेति विशेष्यमर्थबोधइतिपदं वाक्याद्धियते कुतो न संभवतीत्यत आह एकात्मकत्वात् तत्र हि तीरस्यान्यत्वाद्भवति लक्ष्यत्वम् इह तु मायिकोपाधिभेदेपि तदर्थस्यैकत्वमर्थस्य च वस्तुतः स्व
रूपभेदाभावात्तस्मिंस्तद्वाक्ये उपयुक्तत्वाच्च तजहल्लक्षणागम्यत्वं तदप्यस्त्यस्य तदुपायेस्मरज्ञेयं जहन्ना देरिवावस्तुत्वादपीति ननु यथा यजमानः प्रस्तर इत्यत्र यागोपकारकलक्षणया यज
मानः प्रस्तरस्तुतिपरस्तथा तत्त्वमसीत्यत्रापीश्वराच्चेकत्वं हेतुः कर्तृस्तुतिपरः सत्वस्तुतिर्यथास्मेराजगत्स्रजति तथा जीवोपि कर्मणा हस्तहे चार्थस्रजतस्मैव तथाकर्मस्तसाह विरु
र्था वदिति तत्रैक्यप्रतिपादकत्वं संभवति नाहमीश्वरस्त्वादिप्रत्यक्षेण किं विज्ञत्वादिविरुद्धधर्माश्रयत्वलिङ्गेन दासपर्णसयुजेत्यादिश्रुत्या यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि
लोके वेदे च प्रथितः पुरुषोत्तमइत्यादिस्मृत्या वा बाधितत्वसजीवपरभेदस्य यागायोगादिति चेन्नैवम् तत्त्वंसदेवसोम्येदमग्र आसीत् तत्सत्यं स आत्मेत्येवमुपक्रमोपसंहाराद्यवगतादेव तात्पर्यस्यैव
प्रबलत्वात् नाहमीश्वरइत्यादिप्रत्यक्षादीनां कागतिरिति चेदुच्यते वेदान्तप्रसिद्धमतानुसारिबाधितस्यभेदानुभवस्य करणदोषजन्यत्वस्य प्रसिद्धत्वाद्घटानुभववत्प्रत्यक्षमेव सर्वत्रास्तीति विशेषणं
भूतजातिगुणादेरेव वाच्यत्वे नवीकृतत्वमप्याकरणेदृशस्योऽयं तत्त्वमस्यत्वस्यत्वादिधर्मभेदविषयत्वं यथाहमीश्वरइत्यादि सर्वत्वात्सत्यत्वादि मायिकधर्मभेदविषयत्वेन प्रकटमेव अतएव तात्
मानमपि भेदप्रमाणम् मेरोः पाषाणमयत्वानुमानवत्प्रमाणविरुद्धत्वाच्च नापि दासुपर्णेत्याद्यागमविरोधः तत्प्रमाणत्वाद्वाक्यस्याल्पत्वाद्वाक्यस्य प्रबलत्वेन लोकसिद्धभेदानुवादित्वात् सुपर्णादिवाक्यानाम्
बाधकमोपसंहाराद्यवगतादेव तात्पर्यविशिष्टस्य तत्त्वमसीत्यादिवेदान्तवाक्यस्य प्रबलत्वात् न चनिरवयवत्वेनैक्याविरुद्धधर्माश्रयत्वानुपपत्तिः तेषांधर्माणां मायिकत्वात् मायायांचात्रैवप्रमाणवस्प
सिद्धत्वात् किं चाद्वितीयः शक्यार्थापरित्यागेन तत्सम्बन्धिवाधनरूपो जहल्लक्षणाख्यव्यापारः कुत्रापि विशिष्टोत्पादोऽकुत्र घटादिबोधहेतुः सोऽप्यत्र न संभवतीत्याह तथेति अजहल्लक्षणायाप
नार्थबोधः संभवतीत्यर्थः कुत इत्यत आह विरोधत इति स्वशक्यार्थापरित्यागेन तदर्थस्य तत्पदार्थलक्षकत्वं त्वंपदस्य तत्पदार्थलक्षकत्वं वा न संभवति सर्वज्ञत्वाल्पज्ञत्वादिरूपशक्यार्थस्वप
रस्परविरुद्धत्वेन सामानाधिकरण्यासम्भवादिति भावः इदानीं तत्त्वमसीत्यत्र तृतीयः शक्यार्थैकदेशपरित्यागेनैकदेशबोधनरूपो जहदजहल्लक्षणाख्यः शब्दव्यापारः संभवतीति सदृष्टान्तमाह
सोऽयमिति सोऽयंपदार्थाविवक्षार्थत्वात्सप्तमार्थे प्रथमा यथा सोऽयं पदार्थयोर्भागत्यागेन भागलक्षणा प्रयुज्यते तथा तत्त्वंपदयोरपि युज्यते इत्यन्वयः यद्वा यथा सोऽयं पदार्थे भागलक्षणागम्यो तथा तत्त्वंप
दयोरर्थो विभागलक्षणागम्या इति युज्यते इत्यन्वयः अस्मिन्पक्षे अर्थाविवक्षार्थत्वम् लक्षणायाहृस्वतद्बोधिनेताक्षणिकः अर्थविविदितिहि तच नेव वाच कशह्यापे तयैव लक्ष्यार्थस्य स्वस्व
तः शब्दहृदयेप्येकरूपत्वात् अयं भावः कश्चित्तं देवदत्तं पुरुषं कालान्तरे तमेव गोप्यं देवदत्तं सोऽयं देवदत्त इति वदति तत्र वाक्ये यथा तद्देशकालविशिष्टस्य एतद्देशकालविशिष्टस्य विरुद्धत्वांशप
रित्यज्य सोऽयमिति पदयोः केवलदेवदत्तांशलक्षकत्वं युज्यते तथैव तत्त्वंपदयोः सर्वज्ञत्वाल्पज्ञत्वादिविरुद्धवाच्यांशपरित्यागेनाविरुद्धाखण्डचैतन्यभागलक्षणयुज्यते वक्तर
त्यतआह अदोषतइति पूर्वोक्तलक्षणयोरिवात्रदोषाभावादित्यर्थः अजहज्जहल्लक्षणायाहृदोषदोषः तत्त्वात्रप्रतिपाद्यमेव अजहज्जहल्लक्षणाग्रहे तुविरोधादोषः अव्यक्तत्वागपवलक्षणात्वरूपमि
तिन कोपिदोषइतिभावः २७ इदानीं लक्षणायांत्याज्यभागमात्रमा तत्तोमदस्यमापादकमुपाधित्रयमाह त्रिभिः । इमादिपञ्चीकृतभूतसंभवंभोगालयदुःखसुखादिकर्मणाम् शरीरमाद्यन्त

विरुद्धभागेपरित्यज्य यतद्दृश्य
कालदेशिस्मयंशत्याग्रस्य, ३

रा०गी० टी०

दिनादिकर्मणां मायामयं स्थूलमुपाधिरात्मनः ॥ २० । स्थूलं शरीरमात्मन उपाधिर्भवति स्वाध्यासेनात्मनि स्वधर्मैर्भेदभ्रमप्रयोजको भवतीत्यर्थः यथा स्थूलोऽहं ब्राह्मणोऽहमस्मीत्यादि कथंभूतं रसादीनि सप्त
धातूनि षट् चर्मास्थिमज्जो वा ह्याकाशादीनि पंचीकृतानि भूतान्येव संभवउपादानकारणं यस्य तत् तत्र पंचीकरणमेकस्यापि भूतस्य पंचात्मकतापादनमेकमनुमितियावत् तत्प्रकारस्तु द्विधा कृतस्य भूतस्याद्य
र्द्धमेकं च ततस्तु तस्य स्वान्यद्वितीयकार्द्धेषु संयुक्तं पंचतनाकरम् । एवमर्द्धं द्विभूतानामिति तत्त्वमन्यथा जगत् स्वांशाधिक्येन भूम्यादिव्यपदेशो व्यवस्थेति नानित्यं पंचीकृतान्येव सर्वं सर्वं स्थूलकार्यमतर
सादिमहाभूतानां स्वाधारलोकैकवत्तोपरित्यागेन गन्धरसरूपस्पर्शाद्गुणशालीनि संति स्थूलकार्यजनकानि भवन्ति मिलितानामेव तेषामनुभवयोग्यस्य कार्योत्पादकत्वात् पुनः कथंभूतम् दुः
खसुखादीनि कर्माणि कार्याणि येषां ते सपीदिवर्ज्जितानादिविषयाः प्रवादिनां मिश्रितसुखदुःखे तेषां यथाभावस्य यद्यते तेषां संस्कारचित्तकविषयाणां भोगालयमनुभवस्थानम् तथा च यत
लिः कर्मभिस्तु कल्पयोगिन स्त्रिविधमितरेषामिति न वा च शरीरं भवत्कं भोगं के यशरीरकारकत्वमिति तथाचक्रमस् संसारस्यानादित्वात् नतु सकारणत्वेनोपाधेः सत्यत्वमुचितं तथा च तत्त्वमसीत्या
दिवाक्येन त्यागायोगादुक्तं महद्भयं त्वं न स्थितोऽभिमानस्तत्राह मायामयमिति विसदृशप्रतीतिकारणं हि माया तत्कार्यं मदात्मकत्वं स्वप्नेन्द्रजालसदृशमितिभावः इत्युक्तत्वमेके स्थूलशरीरं अ
हिमं तदुपहितं चैतन्यं विश्व इत्युच्यते वनवत् समुदायः समष्टिस्तदुपहितं चैतन्यं विराडिति वैश्वानर इति चोच्यते विविधराजमानत्वात् सर्वनराभिमानित्वाच्च अपमेवोपाधिरत्र विकारत्वाद दृश
9 मयः कोश इत्युच्यते कोऽसत्त्वं स्वाध्यासेनात्मनः कोशवदाच्छादकत्वात् २८ । स्वस्थं मनोबुद्धिरहंक्रियेन्द्रियैः प्राणैरपंचीकृतभूतसम्भवम् भोक्तुः सुखादेरपि साधनं भवेच्छरीरमन्यद्वि
दुरात्मनो बुधाः २९ । उपाधिरितिमायामयमिति इतिनादिकर्मणां मायमिति चानुवर्त्तते बुधा नास्ति उताभ्यस्यत कारणत्वेन स्थूलप्रपंचाद्भिन्नतया व्यवहृतं सूक्ष्ममपि शरीरमात्मन उपाधि
विदुरिति विभक्तिविपरिणामेनान्वयः तत्किंरूपमित्यत आह अरेकैर्तेंद्रियैः प्राणैश्च सह मनोबुद्धिर्मनःसहिता बुद्धिरिति मध्यमपदलोपी समासः तथा चास्य शरीरस्य ह्यादशावयवकत्वे सिद्ध
सिद्धेति मनःसंकल्पात्मकमेकोऽवयवः निश्चयात्मिका बुद्धिर्द्वितीयः अहंकृतमहंकर्त्तृतीयः इंद्रियाणि तु पंच श्रोत्रादीनि पंच च वागादीनि दश प्राणस्तु पंचानीति प्राणस्तु प्राणापानसमानोदा
थानी ४ नव्यानाख्याः पंच तत्र प्राणो नासादौ अपानः पाय्वादौ निखिलशरीरे तु दानः कंठे समानस्तु अशितपीतान्नादि समीकरणं सामाशये संचरति केचिदहंकारं बुद्धावन्तर्भाव्य सप्तदशावयव
कत्वमाहुः यथा पंच प्राणा मनो बुद्धिर्दशेन्द्रियसमन्वितम् अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति ननु भिन्नत्वे स्थूलशरीरवदस्य कथं प्रत्यक्षं नोपलभ्यते इत्यत आह सूक्ष्ममिति सूक्ष्मं कु
तस्त्यत आह अपंचीकृतानि तन्मात्राख्यानि यानि भूतानि तेभ्यः संभवो जन्म यस्य तत् तदयं प्रकरणार्थः वक्ष्यमाणमायाविद्यादिशब्दवाच्यमघटनघटनापटीयस्त्वमावदेकादिविषयाश्रयमनादिरज्ज
सा विक्षेपशक्तिप्रधानं सत्त्वस्वल्पानुभवजन्यसंस्कारमात्रसहकारेण रज्जौ भुजंगादिवच्चिदात्मनि प्रतीतिकनामरूपात्मकं तत्सदाद्याकारेण परिणमति सेव पुनः सृष्टिरित्युच्यते तदुक्तम् विक्षेपश
क्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदिति तत्रादौ सूक्ष्मनामप्रपंचवैचित्र्यहेतुर्जीवानां वासनासहकृतानपरिमितानिरूपितशक्तिविशेषविशिष्टमायोपहिताच्चिदात्मनः इदं सर्वं यामीत्यादि संकल्पश
लिमहत्तत्त्वं लिंगशरीरं जायते तदुपहितस्त्वात्मा हिरण्यगर्भः प्राणः सूत्रात्मेति चोच्यते अयं तु ब्रह्मादिवित्तलक्षण इव जीवः स चेश्वर इत्युच्यते सर्वशरीरीप्रथमः स वै पुरुष उच्यते आदिकर्त्ता स भू
तानां ब्रह्माग्रे समवर्त्तत हिरण्यगर्भः समवर्त्तताग्र इत्यादिश्रुतेः ततस्तदधिष्ठिते महति तत्त्वाभिभूतानि जीवलिङ्गशरीराण्युत्पद्यन्ते तत्रादौ चित्तमिति विद्याविक्षेपवाहद्धारस्य पशुभीतो भव
ति स च जीव इत्युच्यते तत्रावच्छिन्नसाक्षिणस्तु न वासनावंजीवत्वम् तदुक्तम् अहंकारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः सहजं कर्मजं भ्रान्तिजं च त्रिविधं क्रमादिति तत्राहंकारे मिलीनायाः प्र
वीनुभूतपंचभूतात्मकप्रपंचवासनायाः पवाविर्भवं त्र्योश पंचीकृतभूतानीत्युच्यन्ते तत्राकाशस्य वासनाशब्दतन्मात्रं जायते ततश्च वायोः स्पर्शतन्मात्रं ततश्चाग्ने रूपतन्मात्रम् ततश्च जलस्य रसत ४
न्मात्रं ततश्च पृथिव्या गन्धतन्मात्रमुत्पद्यते ततस्तेभ्यस्तन्मात्रेभ्यः पंचीकृतमहाभूतेभ्यः सूक्ष्मशरीरमुत्पद्यते तद्यथा तेषां त्रिगुणानां मध्यादौ सत्त्वप्राधान्येन ज्ञानशक्तिप्रधानान्तःकरणचतु
ष्टयरूपपरिणामो भवति ततश्चान्तःकरणरूपेण परिणतानां शब्दादितन्मात्राणां क्रमेण ज्ञानेन्द्रियरूपः परिणामो भवति यथा शब्दतन्मात्राच्छ्रोत्रं स्पर्शतन्मात्रात्त्वक् रूपतन्मात्राच्चक्षुः रसतन्मा

त्राऽसनं गन्धतन्मात्राच्च घ्राणं प्रजायते । ततश्च ज्ञानेन्द्रियाकारेण परिणतानां पञ्चविक्षेपकरजःप्राधान्योदये सति क्रमेण पञ्चकं कर्मेन्द्रियपंचकं च परिणामो भवति । तदिदं सूक्ष्मशरीरस्यापञ्चीकृतभूतसंभवत्वं
व्याख्यातम् । ततश्च वासनात्मकात्तद्रूपपञ्चमहाभूतकार्यत्वान्नान्यप्रमत्वाविषयत्वमस्येति भावः । तत्र पंचीकृतभूतत्वं नाम प्रत्येकमेकसत्त्वावस्थायां जाग्रतीन्द्रियाकारेण परिणतानां तन्मात्राणां गुणपत्र
वर्तमानानां गुणप्रधानभावादिमिलितानां मवशिष्टमलिनतमःप्राधान्येन समष्ट्या तु सारतरं यं भूमिरेवेदं जलमेवेत्येवं नियतलौकिकभूम्यादिव्यवहारहेतुः परिणामविशेषो जायते । तेषां जडा
नां पंचीकृतभूतानां प्रारब्धभोगानुकूलशरीरादिब्रह्माण्डजं जगद्रूपत्वं तत्प्रसिद्धमेवास्ति । बालबोधना तावत्समस्तादिति चैतन्यप्रतिबिंबावेशेन लब्धात्मिका त्रिगुणा बुद्धिः सत्त्वरजोभ्यां जगदाकारेण
परिणमन्ती अनियतमपरिमितमनवसानं वा जगत्सृजेद्यदि गुरुत्वात्मकेन तमसा कोशपंचककालाघवच्छेदान्न नियमेत स्यादेतत् । तथा च स्वप्ने अहंकारादीनां स्वपरिणामस्य ग्राहकत्वं
वः स्यात् पृथ्व्यपि जलस्य फेनशैवालादिवद्व्यापितत्वेन तद्गुणविशेषावशेषेनैकदेशस्यैव परिणाम इति कथं चिन्न दोषः । निद्राभिभूतस्यापि जाग्रतो तेषां स्वस्य स्वपरिणामस्य च ग्रहणं वर्णितं यान्यत्तेनैव ग्रह
णं न संभवेदेवेति चेन्न । स्वभावसत्त्वप्राधान्यात्स्वाधिष्ठानसाक्षिचेतनप्रतिबिंबावेशेन विहृद्वाभासमानानां तेषां स्वस्य स्वपरिणामस्य च ग्रहणे बाधकाभावात् । यथा स्वप्ने सद्यः जाग्र
त्संस्काररूपाः संकल्पाः स्वपरिणामं स्वाप्नप्रपंचमन्यत्वेन विषयीकुर्वन्ति । यथा वा सुगन्धबालसंकल्पाः स्वपरिणामं मंडमालादिकमन्यत्वेन गृह्णन्ति । तथा ग्राह्यस्यापि स्वपरिणामस्यान्यत्वेन ग्रहणं विस्तृ
ते । किं च विशुद्धसत्त्वप्राधान्यादन्तःकरणे साक्षिचेतनस्य समाकृतिसंक्रमात्स्वस्य द्विधा दिदृक्षोः स्वपरिणामस्य चैषा ग्राहकत्वमुपपद्यते । चक्षुरादीन्द्रियाणां तु सत्त्वरजःप्रधानान्तःकरणपरिणामत्वे
पाणामन्तःकरणेनैवान्यथमान्द्यपटुत्वादिधर्मैर्गृहीतानां स्वपरिणामस्य रूपादेरेव ग्राहकत्वं न तु स्वस्यापि स्वकारणस्य तथा च श्रुतिः पराञ्चि खानि व्यतृणत्स्वयंभूरिति ग्राहकत्वं नामैषां स्वावच्छिन्न
चेतनत्वे स्वपरिणामावेदकत्वम् । तदेव चैषां करणत्वं स्वयं वहरति । पंचीकृतमहाभूतकार्यस्थूलपदार्थानां तु ग्राह्यत्वमेव न कस्यचिद्ग्राहकत्वम् । एतदेव सर्वश्रुतिः कारणत्वसाक्षित्वपरेण स्कन्न
लायेतये [illegible] जालिकरवन्नम्युक्तमामग्र तच्चबोधयता परमशास्त्रप्रयोगेण गीतायां प्रदर्शयामास । इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः इति । एवं च व्यवहा
रदशायां कार्यकारणतायाद्वैतस्याभेदेनत्वकारणप्रास्तु संस्कारविशेषप्रभेदेन च जायमानः सर्वोऽपि जागतपदार्थकलापः स्वप्नवन्नीयः । न चैवं जगतो जीवबुद्धिपरिणामत्वेऽस्तु ततः सर्वेषां नैकजीव
धारणस्तदुपलंभो न स्यादिति वाच्यम् । सप्रभवतदुपपत्तेः । मनस्वप्ने संकल्पविशेषरूपाणां तत्तत्स्वाप्नजीवबुद्धीनां साधारणसंस्कारांशानुसरणेनैकसाधारणस्यास्य जगदाकारपरिणामनियामिका
यास्तन्त्रमाश्रित्य भूतायाहिरण्यगर्भबुद्धेः स्वीकृतत्वात् तेनैव स्वप्नद्रष्टृत्वेन जीवानां तथा तथा नियतकारजगदुपलंभो बालवेतालवदलीकयोर्वा ह्रिसमष्टो मन्त्रतत्स्वरूपापादकसाक्षिचेतन्यप्रति
बिंबरूपयोर्जीवेश्वरयोश्च वस्तुतोऽन्योन्यमभेदः साक्षिणस्तु भेदविक्रियास्पृष्टत्वमेवेत्येवमास्तां तेन सर्वं हि सिद्धिः । किं त्वीश्वरस्य सर्वज्ञत्वेन [illegible] तिपावनाहहा [illegible] त्वमश्चमहे नजानाति [illegible] पलम्य मानम
तानं तदर्शानीत्रिकधर्मत्वमवगाहत इति चेन्न । अज्ञानबुद्धितत्साक्षितद्भावानां साक्षिनया सर्वदा प्रकाशमानेऽनावृतेऽधिष्ठानभूते कूटस्थचेतनारोजोऽत्यज्ञः सेदानेकबुद्धिपरिणामत्वेऽवस्थितस्य साधा
रणस्यास्य जगतो वयवत्वेनभासमानानां पदार्थानां स्वपरिणामत्वाभावे तमानादिनान्यबुद्धिपरिणामत्वेन स्वीकारदशायां व्यवहितत्वात्कथंचिदास्तां तावदज्ञानतत्त्ववहारः समष्टिबुद्धात्वयद
ज्ञानं तदकल्पितत्वाज्ञास्येवेति कथं तदज्ञानेन सर्वज्ञत्वमिति हिरण्यगर्भादीनां कथं सर्वज्ञत्वस्य सुस्थत्वात् । न हि स्वबुद्धिमज्ञानं किंचिदज्ञो भवति । किं चेश्वरानेकत्वे कार्याननुपपत्तेरनवस्था
प्रसंगात्सर्वगर्भावधीनायाः समष्टेर्द्वितीयायाप्येश्वरत्वप्रयोजकत्वाच्चैकवेश्वरः प्राणिनां शुभाशुभमिश्रितानां कर्मवासनानां क्रमेण स्वर्गनरकमर्त्यकारणाद्वारा तथा तथा त्वहं
संस्कारानेरयतीति सिद्धम् । न चैवं जीवेश्वरभेदः शास्त्रः । तस्य तु प्रातदेवानुप्राविशदिति श्रुतेः । समस्तत्रिधिमात्रतो जगदाकारपरिणमत्यास्वामिन्या मायाशक्त्याश्च प्रतिबिंबजीवद्रूपेण
विद्यादकत्वे रेवेश्वरस्य कूटस्थस्यैव सर्वपोपकारकत्वेन प्रतिप्रतिबिंबस्य यस्यैव प्रतिजीवं सादिजीवरूपेणावस्थितत्वाच्च । न चैवं जीवेश्वरभेदः शास्त्रः । तस्य तु प्रातदेवानुप्राविशदिति श्रुतेः
समस्तिधिमात्रतो बुद्धेरविद्यात्मकत्वान्नहि त्रिविशेषरूपाविद्याध्यासिद्धेवेति कथं तन्त्रिवर्त्तिकास्यादिति वाच्यम् । कनककरजोवद्विरूद्धस्वभावत्वात् यथा वारिणि निःक्षिप्तकतकरजो नीरं निवर्त्य स्वयं

रजो.

रा.गी.
टी.
९

मोर्षनिवर्त्तते तथाविद्याप्यविद्यांनिवर्त्यस्वयमपिनिवर्त्तते यदात्मादिविवेकनिर्मथनेनबुद्धिकाष्ठादुत्पन्नस्यविद्यावह्नेःस्वरूपनिर्दिदीहसर्वक:स्वस्यापुष्पाभावाद्विवादृश तथाचोक्तमात्मानादित
रांतस्यसर्वस्यजेयतेनदेत्वशाबाच्यस्यजीवस्यात्माभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीति सत्यादिभ्योवाहिसमरितबुद्धिप्रतिबिंबितचिदाभासाविवेकेनकर्माज्ञीवस्यरक्तावाच्य
स्यायस्तत्पदार्थस्यतत्वपरिणामित्वादिविशिष्टस्यस्वस्वरूपेनालूवेदास्तवतस्तदधिष्ठानस्यवस्तुभूतस्यतत्त्वादिगुणलक्षणयाजीवेश्वरयोभाभादेवकूटस्थरूपशुद्धाभ्यांचवस्तुवत्स्य
चिदात्मनोज्ञानवृत्त्येसंस्पर्शाभावस्यप्रसिद्धत्वेनततत्वप्रापारेशुनियमानेपुनक्रियमाणेप्रविप्रलेकेनतत्वशोधनक्रेणेनतत्पदार्थयोर्वर्षद्वेनचस्वप्रमाणादिवद्दृष्टतत्त्वमदायवनावच्छिन्नाका
शादृष्टान्नमेदेनापिविक्रियेतिसिद्धान्तोनिष्पन्नः तत्रमायिकानादिजगदासनात्संकल्पात्मनापरिणमत्सत्त्वप्रिविभवति तदाहिसमष्टिविशिष्टचित्प्रकाशःकर्माज्ञीवशोमादिनयातदस्युक्ता
तदधिष्ठानवस्तुनावितिस्तुत्युद्धबत्वेतिसिद्धम् एवंचमायामयबुद्धिपरिणामत्वेजगतःस्वप्नादिवत्वाधिष्ठानसाक्षिवतत्पात्मस्फुरत्वाप्रतिसंक्रमेणानुभवावसरेस्वरूपनिष्प्रतिर्भविष्यतीति
भविष्यत्वगरत्वप्रतिपादनेनितिद्धार्याबुद्धेःस्वकारणाज्ञानेविलयान्नित्यफलप्रतिपादनेनसर्वेबल्लिदंब्रह्मेतिश्रुत्यास्याधिष्ठानवस्तुदृष्टत्वप्रतिपादनेनेहनानास्तिकिंचनेतिश्रुत्यानुभूयमा
नस्यापितस्याप्रत्याभावप्रतिपादनेनजोवेजगत्येवनिर्येकरस्यधिष्ठानेतस्यप्रतीत्याद्युक्तत्वाद्दृष्टयोःकाप्यातेपरंवादाभ्यांबाधनेनतत्रिवृत्तेविशेषाभावादद्वयमोक्षाभावप्रतिपादनेचसंगच्छ
ते तथाचश्रुतिः नचनिरोधोनचोत्पत्तिर्नवद्धोनचसाधकः नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थतेति श्रुतेरपि मायामेचोजगन्नीरंवर्णयन्तेयथाचा चिदाकाशस्यनोहानिर्नवालामइतिश्रुतिः
एकावृत्तिःकोयमात्मासकोन्नात्मात्रजगत्कथं इत्यनिरीयतेमोहःसोयंसंसारउच्यते ५ बुद्ध्यादीनांस्वरूपंयोवेत्तिनक्षिसत्वमवित सएवमुक्तइत्येवंवेदान्तेषुविनिश्चयः ३ एवंचसतिव
त्यन्स्यात्कस्मादिकतर्कजाः विज्ञेयमाहइत्यंशः एतदुक्तंप्रकारतदुक्तप्रकृतमनुसरामः स्यात्पदेदेशिनिश्चयेपष्ठी तस्यत्वंस्वरूपःपूर्वोक्तस्यभोक्तुर्भोगायतनसाधनंकरणमभेदतः स्थूल
शरीरस्यजन्यभोगायतनत्वेपिकरणत्वासम्भवः तद्देशिक्षितत्वस्यापितथात्वमिदमेवइत्यवमत्येकेलिङ्गशरीरंनुयात्तदुपहितंचैतन्यंतैजसमित्युच्यते तेजोमयान्तःकरणोपहि
तत्वात् तच्चसूक्ष्मशरीरंकोशत्रयात्मकंभवति यथाकर्मेन्द्रियैःसहितःप्राणःप्राणमयःकोशःज्ञानेन्द्रियसहितंमनोमनोमयःकोशःज्ञानेन्द्रियैःसहिताबुद्धिर्विज्ञानमयःकोशःइतिकोश
त्रयंवेदान्तेषूक्तम् ।अथइदंकारणतत्त्वाध्यासेनात्मनयाध्यासादकत्वात् २६ । अथकारणशरीरंचमयोक्तकारणंमायाप्रधानेनतत्परंपराशरीरकम् उपाधिभेदादन्वयतः इत्यत्रिधतेसामान्यात्मवदपर
स्यक्रमात् २०।

वा

वेदांत